# APPENDIX - II.

## SANSKRIT VERSES ON OATHS AND ORDEALS BY VARIOUS WRITERS.

Verses on Oaths and Ordeals by various writers referred to in the foot notes are collected in this appendix. Verses of the Smṛtikāras known only from quotations are arranged topic-wise in serial order. Such verses are referred to in foot notes with their serial number under that particular author (e.g. Pit 5 = 5th verse under Pitāmaha). The verses are found quoted in number of digests. All the sources of the quotations are not referred to but only one or two, preference being given to the following works:

अपरार्क (अप), दिव्यतत्त्व(दि॰त॰), बालंभट्टी (बालं), मिताक्षरा(मिता), सरस्वतीविलास(स॰वि॰), स्मृतिचंद्रिका(स्मृच), व्यवहारकल्पतरु(व्य॰क॰), व्यवहारप्रकाश(व्य॰प्र॰), व्यवहारमयूख(व्य.म॰), and धर्मकोश .

The text is arranged in following order:


1) S'ankha and Likhita. p.453
2) Manu. p 453
3) Viṣṇu. p.454
4) Yājñavalkya. p. 457
5) Nārada. p.458
6) Nāradīyamanusaṁhitā. p.466
7) Bṛhaspati. p. 469
8) Kātyāyana. p 472
9) Pitāmaha. p.479
10) Prajāpati. p.490
11) Yama. p. 490
(12) Vyāsa. p 490
(13) Hārīta. p.491
(14) Vṛddhahārīta. p.491
(15) Māṇḍavya. p.491
(16) Atri. p.492
(17) Anirdiṣṭakartṛkavacana. p.492
(18) Kālikāpurāṇa. p.493
(19) Padmapurāṇa. p 493
(20) Saṁkīrṇadivyāni. p.494
(21) S'ukranīti. p.494
(22) Kaumārikākhaṇḍa. p 495.

(१) Śankha and Likhita

१) असाक्षिप्रणिहिते दि०यम् / अथवा मित्रैः सज्जनैरात्मानं वा शोधयेदेव / स चेद्दण्ड्यो ऽर्थिनां चार्थं दापयेत् / अप.२.२६९

२) असाक्षिप्रणिहिते पुरःप्रत्ययः शासनं भेदनं ताडनम् / संन्यस्ते वा विवादे वा दैवं वा कोशविषभक्षणशस्त्रजलम् / ०यक.पृ.१९८

३) [redacted] तत्र दि०यं नाम तुलारोहणं विषाशनमप्सु प्रवेशो लोहधारण--मिष्टापूर्तप्रदानमन्यांश्च शपथान्कारयेत् / अप.२.९५,०य.प्र.१७०

४) अथवा सप्ताश्वत्थपर्णान्तरितं षोडशपलमग्निवर्णं पिण्डमंजलिनाऽऽदाय सप्तमर्यादां [redacted] गच्छेत् / ०य.प्र.१९६

५) नाभिप्रमाणोदकस्थो यज्ञियवृक्षोद्भवां धर्मस्थूणामवष्टभ्य प्राङ्मुखस्तिष्ठेत् / ०य.प्र.२०६

६) सदसच्च त्वमेव वरुण,उभयोः प्रतिष्ठितः,त्वयि सत्यं त्विदं देव,वरुण, त्वमेव तद् ब्रूहि वरेण्य तदादिशस्व / ०य.प्र.२०६

---

(२) Manu

| | |
|---|---|
| असाक्षिकेषु त्वर्थेषु मिथो विवदमानयोः | : |
| अविन्दंस्तत्वतः सत्यं शपथेनाऽपि लम्भयेत् | :: ८.१०९ |
| महर्षिभिश्च देवैश्च कार्यार्थं शपथाः कृताः | : |
| वसिष्ठश्चापि शपथं शेपे पैजवने नृपे | :: ८.११० |
| न वृथा शपथं कुर्यात् स्वल्पेऽप्यर्थे नरो बुधः | : |
| वृथा हि शपथं कुर्वन् प्रेत्य चेह च नश्यति | :: ८.१११ |
| कामिनीषु विवाहेषु गवां भक्ष्ये तथेन्धने | : |
| ब्राह्मणाभ्युपपत्तौ च शपथे नास्ति पातकम् | :: ८.११२ |

सत्येन शापयेद्विप्रं क्षत्रियं वाहनायुधैः /
गोबीजकांचनैर्वैश्यं शूद्रं सर्वैस्तु पातकैः / ८.११३
अग्निं वाऽऽहारयेदेनमप्सु चैनं निमज्जयेत् /
पुत्रदारस्य वाप्येनं शिरांसि स्पर्शयेत्पृथक् / ८.११४
यमिद्धो न दहत्यग्निरापो नोन्मज्जयन्ति च /
न चार्तिमृच्छति क्षिप्रं स ज्ञेयः शपथे शुचिः / ८.११५
वत्सस्य ह्यभिशस्तस्य पुरा भ्रात्रा यवीयसा /
नाग्निर्ददाह रोमापि सत्येन जगतः स्पशः / ८.११६

---

(३) Viṣṇu

अथ समयक्रिया(९.१),राजद्रोहसाहसेषु यथाकामम्(९.२),निक्षेपस्तेयेष्वर्थप्रमाणात् (९.३),सर्वेष्वर्थजातेषु मूल्यं कनकं कल्पयेत्(९.४),तत्र कृष्णलोने शूद्रं दूर्वाकरं शापयेत् (९.५),द्विकृष्णलोने तिलकरम्(९.६),त्रिकृष्णलोने रजतकरम्(९.७),चतुःकृष्णलोने सुवर्णकरम्(९.८),पंचकृष्णलोने सीरोद्धृतमहीकरम्(९.९),सुवर्णार्धोने कोशो देयः शूद्रस्य(९.१०),ततः परं यथार्हं घटाग्न्युदकविषाणामन्यतमम्(९.११),द्विगुणेऽर्थे यथाभिहिता समयक्रिया वैश्यस्य(९.१२),त्रिगुणे राजन्यस्य(९.१३),कोशवर्जं चतुर्गुणे ब्राह्मणस्य(९.१४),न ब्राह्मणस्य कोशं दद्यात्(९.१५),अन्यत्र आगामिकालसमय--- निबन्धनक्रियातः(९.१६),कोशस्थाने ब्राह्मणं सीतो(रो)द्धृतमहीकरमेव(९.१७), प्रागुद्दष्टदोषं स्वल्पेऽप्यर्थे दि०यानामन्यतममेव कारयेत्(९.१८),सत्सु विदितं सच्चरित्रं न महत्यर्थेऽपि(९.१९),अभियोक्ता वर्तयेच्छीर्षम्(९.२०),अभियुक्तश्च दि०यं कुर्यात्(९.२१),राजद्रोहसाहसेषु विनापि शीर्षवर्तनात्(९.२२),स्त्रीब्राह्मण-- विकलासमर्थरोगिणां तुला(९.२३),सा च न वाति वायौ(९.२४),न कुष्ठ्यसमर्थ-- लोहकाराणां अग्निर्देयः(९.२५),शरद्ग्रीष्मयोश्च(९.२६),न कुष्ठपैत्तिकब्राह्मणानां विषं देयम्(९.२७),प्रावृषि च(९.२८),न श्लेष्म०याध्यर्दितानां भीरूणां श्वासका-- सिनामम्बुजीविनां चोदकम्(९.२९),हेमन्तशिशिरयोश्च(९.३०),न नास्तिकेभ्यः कोशो देयः(९.३१),न देशे ०याधिमरणोपसृष्टे च(९.३२),

सचैलस्नातमाहूय सूर्योदय उपोषितम् /
कारयेत् सर्वदि०यानि देवब्राह्मणसन्निधौ / (९.३३)

(९. १-३३)

------

अथ घट:(१०.१),चतुर्हस्तोच्छ्रितो द्विहस्तायत:(.२),तत्र शालवृक्षोद्भवा पंचहस्तायतोभयत: शिक्या तुला(.३),तां च सुवर्णकारकांस्यकाराणामन्यतमो बिभृयात्(.४), तत्र चैकस्मिन् शिक्ये पुरुषमारोपयेत् द्वितीये प्रतिमानं शिलादि(.५),प्रतिमानपुरुषौ समधृतौ सुचिह्नितौ कृत्वा पुरुषमवतारयेत्(.६),घटं च समयेन गृह्णीयात्(.७), तुलाधारं च(.८),

ब्रह्मघ्नां ये स्मृता लोका ये लोका: कूटसाक्षिणाम् /
तुलाधारस्य ते लोकास्तुलां धारयतो मृषा / (.९)
धर्मपर्यायवचनं घट इत्यभिधीयसे /
त्वमेव घट जानीषे न विदुर्यानि मानुषा: / (.१०)
व्यवहाराभिशस्तोऽयं मानुषस्तोल्यते त्वयि
तदेनं संशयादस्माद्धर्मतस्त्रातुमर्हसि / (.११)
ततस्त्वारोपयेच्छिक्ये भूय अेवाथ तं नरम् /
तुलितो यदि वर्धेत तत: स धर्मत: शुचि: / (.१२)
शिक्यच्छेदाक्षभंगेषु भूयस्त्वारोपयेन्नरम् /
अेवं नि:संशयं ज्ञानं यतो भवति निर्णय: / (.१३) (१०.१--१३)

--------------

अथाग्नि:(११.१),षोडशांगुलं तावदन्तरं मण्डलसप्तकं कुर्यात्(.२),तत: प्राङ्मुखस्य प्रसारितभुजद्वयस्य सप्ताश्वत्थपत्राणि करयोर्दद्यात्(.३),तानि च करद्वयसहितानि सूत्रेण वेष्टयेत्(.४),ततस्तत्राग्निवर्णं लोहपिण्डं पंचाशत्पलिकं समं न्यसेत्(.५), तमादाय नातिद्रुतं नातिविलम्बितं मण्डलेषु पदन्यासं कुर्वन् व्रजेत्(.६),तत: सप्तमं मण्डलमतीत्य भूमौ लोहपिण्डं जह्यात्(.७),

यो हस्तयो: क्वचिद्दग्धस्तमशुद्धं विनिर्दिशेत् /
न दग्ध: सर्वथा यस्तु स विशुद्धो भवेन्नर: / (.८)
भयाद्वा पातयेद्यस्तु दग्धो वा न विभाव्यते /
पुनस्तं हारयेल्लोहं समयस्याविशोधनात् / (.९)
करौ विमृदितव्रीही तस्यादावेव लक्षयेत् /
अभिमन्त्र्यास्य करयोर्लोहपिण्डं ततो न्यसेत् / (.१०)

त्वमग्ने सर्वभूतानामन्तश्चरसि साक्षिवत् /
त्वमेवाग्ने विजानीषे न विदुर्यानि मानवा: / (.११)
व्यवहाराभिशस्तोऽयं मानुष: शुद्धिमिच्छति /
तदेनं संशयादस्माद्धर्मतस्त्रातुमर्हसि / (.१२) ( ११.१-१२)

---------------

अथोदकम्(१२.१),पंकशैवालदुष्टग्राहमत्स्यजलौकादिवर्जितेऽम्भसि(.२),तत्रानाभि--
मग्नस्यारागद्वेषिण: पुरुषस्यान्यस्य जानुनी गृहीत्वाभिमन्त्रितमम्भ: प्रविशेत्(.३),
तत्समकालं च नातिक्रूरमृदुना धनुषा पुरुषोऽपर: शरक्षेपं कुर्यात्(.४),तं चापर:
पुरुषो जवेन शरमानयेत्(.५),
तन्मध्ये यो न दृश्येत स शुद्ध: परिकीर्तित: /
अन्यथा त्वविशुद्ध: स्यादेकांगस्यापि दर्शने / (.६),
त्वमम्भ: सर्वभूतानामन्तश्चरसि साक्षिवत् /
त्वमेवाम्भो विजानीषे न विदुर्यानि मानवा: / (.७)
व्यवहाराभिशस्तोऽयं मानुषस्त्वयि मज्जति /
तदेनं संशयादस्माद्धर्मतस्त्रातुमर्हसि / (.८) (१२.१-८)

---------------

अथ विषम्(१३.१),विषाणि अदेयानि सर्वाणि(न .२),ऋते हिमाचलोद्भवाच्छा--
[illegible] ङ्गात्(.३),तस्य च यवसप्तकं घृतप्लुतमभिशस्ताय दद्यात्(.४),
विषं वेगक्रमापेतं सुखेन यदि जीर्यते /
विशुद्धं तमिति ज्ञात्वा दिवसान्ते विसर्जयेत् / (.५)
विषत्वाद् विषमत्वाच्च क्रूरस्त्वं सर्वदेहिनाम् /
त्वमेव विष जानीषे न विदुर्यानि मानुषा: / (.६)
व्यवहाराभिशस्तोऽयं मानुष: शुद्धिमिच्छति /
तदेनं संशयादस्माद्धर्मतस्त्रातुमर्हसि / (.७) (१३.१-७)

---------------

अथ कोश:(१४.१),उग्रान् देवान् समभ्यर्च्य तत्स्नानोदकात् प्रसृतित्रयं पिबेत्(.२),
इदं मया न कृतमिति देवताभिमुख:(.३),
यस्य पश्येद्द्विसप्ताहात्त्रिसप्ताहादथापि वा /
रोगोऽग्निर्ज्ञातिमरणं राजदण्डमथापि वा / (.४)
तमशुद्धं विजानीयात् तथा शुद्धं विपर्यये /
दिव्ये च शुद्धं पुरुषं सत्कुर्याद्धार्मिको नृप: / (.५) (१४.१-५)

(४) Yājñavalkya

प्रमाणं लिखितं भुक्ति: साक्षिणश्चेति कीर्तितम् /
अेषामन्यतमाभावे दि०यान्यतममुच्यते / (२.२२)
तुलाग्न्यापो विषं कोशो दि०यानीह विशुद्धये /
महाभियोगेष्वेतानि शीर्षकस्थेऽभियोक्तरि / (२.९५)
रूच्या वान्यतर: कुर्यादितरो वर्तयेच्छिर: /
विनापि शीर्षकात्कुर्यान्नृपद्रोहेऽथ पातके / (२.९६)
सचैलं स्नातमाहूय सूर्योदय अुपोषितम् /
कारयेत् सर्वदि०यानि नृपब्राह्मणसन्निधौ / (२.९७)
तुला स्त्रीबालवृद्धान्धपंगुब्राह्मणरोगिणाम् /
अग्निर्जलं वा शूद्रस्य यवा: सप्त विषस्य वा / (२.९८)
नासहस्राद्धरेत्फालं न विषं न तुलां तथा /
नृपार्थेष्वभिशापे च वहेयु: शुचय: सदा / (२.९९)
तुलाधारणविद्वद्भिरभियुक्तस्तुलाश्रित: /
प्रतिमानसमीभूतो रेखां कृत्वावतारित: / (२.१००)
त्वं तुले सत्यधामासि पुरा देवैर्विनिर्मिता /
तत्सत्यं वद कल्याणि संशयान्मां विमोचय / ६०००० (२.१०१)
यधस्मि पापकृन्मातस्ततो मां त्वमधो नय /
शुद्धश्चेद्गमयोर्ध्वं मां तुलामित्यभिमन्त्रयेत् / (२.१०२)
करौ विमृदितव्रीहेर्लक्षयित्वा ततो न्यसेत् /
सप्ताश्वत्थस्य पत्राणि तावत्सूत्रेण वेष्टयेत् / (२.१०३)
त्वमग्ने सर्वभूतानामन्तश्चरसि पावक /
साक्षिवत्पुण्यपापेभ्यो ब्रूहि सत्यं कवे मम / (२.१०४)
तस्येत्युक्तवतो लौहं पंचाशत्पलिकं समम् /
अग्निवर्णं न्यसेत्पिण्डं हस्तयोरुभयोरपि / (२.१०५)
स तमादाय सप्तैव मण्डलानि शनैर्व्रजेत् /
षोडशांगुलकं ज्ञेयं मण्डलं तावदन्तरम् / (२.१०६)
मुक्त्वाग्निं मृदितव्रीहिरदग्ध: शुद्धिमाप्नुयात् /
अन्तरा पतिते पिण्डे सन्देहे वा पुनर्हरेत् / (२.१०७)

सत्येन माभिरक्ष त्वं वरगेत्यभिशाप्य कम् :
नाभिदघ्नोदकस्थस्य गृहीत्वोरू जलं विशेत् ::२.१०८::
समकालमिषुं मुक्तमानीयान्यो जवी नरः :
गते तस्मिन्निमग्नांगं पश्येच्चेच्छुद्धिमाप्नुयात् ::२.१०९::
त्वं विष ब्रह्मणः पुत्रः सत्यधर्मे व्यवस्थितः :
त्रायस्वास्मादभीशापात्सत्येन भव मेऽमृतम् ::२.११०
एवमुक्त्वा विषं शार्ङ्गं भक्षयेद्धिमशैलजम् :
यस्य वेगैर्विना जीर्येच्छुद्धिं तस्य विनिर्दिशेत् ::२.१११
देवानुग्रान् समभ्यर्च्य तत्स्नानोदकमाहरेत् :
संश्राव्य पाययेत्तस्माज्जलं तु प्रसृतित्रयम् ::२.११२
अर्वाक् चतुर्दशादह्नो यस्य नो राजदैविकम् :
व्यसनं जायते घोरं स शुद्धः स्यान्न संशयः ::२.११३

---

(५) Nārada (Ed: J. Jolly)
Chapter II

क्रियापि द्विविधा प्रोक्ता मानुषी दैविकी तथा :
मानुषी लेख्यसाक्षिभ्यां घटादिर्दैविकी स्मृता ::२.२८
दिवाकृते कार्यविधौ ग्रामेषु नगरेषु वा :
संभवे साक्षिणां चैव दिव्या न भवति क्रिया ::२.२९
अरण्ये निर्जने रात्रावन्तर्वेश्मनि साहसे :
न्यासस्यापह्नवे चैव दिव्या संभवति क्रिया ::२.३०
Bṛādāna (taken as chapter IV)
युक्तिष्वप्यसमर्थासु शपथैरेनमर्दयेत् :
देशकालबलापेक्षमग्न्यम्बुसुकृतादिभिः ::४.२३९
यमन्तर्धारयंत्यापो दीप्तोऽग्निर्न दहत्यपि :
शापयत्यभिशापं तं किल्बिषी स्यादतोऽन्यथा ::४.२४०

अरण्ये निर्जने रात्रावन्तर्वेश्मनि साहसे :
न्यासस्यापह्नवे चैव दिव्या संभवति क्रिया ::४.२४१
स्त्रीणां शीलाभियोगेषु स्तेयसाहसयोरपि :
अेष अेव विधिर्दृष्टः सर्वार्थापह्नवेषु च :: ४.२४२
शपथा अपि देवानामृषीणामपि च स्मृताः :
वसिष्ठः शपथं शेपे यातुधानेन रक्षितः :: ४.२४३
सप्तर्षयस्तथेन्द्रेण पुष्करार्थेन शंकिताः :
शेपुः शपथमव्यग्राः परस्परविशुद्धये :: ४.२४४
यदा साक्षी न विद्येत विवादे वदतां नृणाम् :
तदा दिव्यैः परीक्षेत शपथैश्च पृथग्विधैः :: ४.२४७
सत्यं वाहनशस्त्राणि गोबीजकनकादि च :
देवतापितृपादाश्च दत्तानि सुकृतानि च :: ४.२४८
महापराधे दिव्यानि दापयेत्तु महीपतिः :
अल्पेषु तु नृपश्रेष्ठः शपथैः श्रावयेन्नरम् :: ४.२४९
इत्येते शपथाः प्रोक्ता मनुना स्वल्पकारणे :
पातकेष्टाभियोगे च विधिर्दिव्यः प्रकीर्तितः :: ४.२५०
संदिग्धेऽर्थेऽभियुक्तानां प्रच्छन्नेषु विशेषतः :
दैवं पंचविधं ज्ञेयमित्याह भगवान्मनुः :: ४.२५१
धटोऽग्निरुदकं चैव विषं कोशश्च पंचमः :
अुक्तान्येतानि दिव्यानि विशुद्ध्यर्थं महात्मनाम् :: ४.२५२
संदिग्धेऽर्थेऽभियुक्तानां विशुद्ध्यर्थं दुरात्मनाम् :
प्रोक्तानि नारदेनेह सत्यानृतविशुद्धये :: ४.२५३
वर्षासु वह्निरित्युक्तः शिशिरे तु धटः स्मृतः :
ग्रीष्मे सलिलमित्युक्तं विषं काले तु शीतले :: ४.२५४
नार्तानां तोयशुद्धिः स्यान्न विषं पित्तरोगिणाम् :
श्वित्र्यन्धकुनखीनां च नाग्निशुद्धिर्विधीयते :: ४.२५५
सव्रतानां मृशार्तानां व्याधितानां तपस्विनाम् :
स्त्रीणां च न भवेद्दिव्यं यदि धर्मस्त्ववेक्ष्यते :: ४.२५६
शिरोवर्ती यदा न स्यात्तदा दिव्यं न दीयते :
कारणैः सहितं प्रोक्तं न दिव्यं चार्थिनां नृणाम् :: ४.२५७

तत्प्रश्नेन विनीतेन धार्मिकेन विजानता :
उभयानुमते देयं दिव्यं सर्वं प्रयत्नतः :: ४.२५८
न शीते तोयशुद्धिः स्यान्नोष्णकालेऽग्निशोधनम् :
न प्रावृषि विषं दद्यात् प्रवाते न तुलां नृणाम् ::४.२५९
विचार्य धर्मनिपुणैः सर्वधर्मविशारदैः :
इदं सर्वर्तुकं प्रोक्तं पण्डितैर्घटधारणम् :: ४.२६०
हस्तद्वयं तु निखेयमुक्तं मुण्डकयोः सदा :
षड्ढस्तं तु तयोर्दृष्टं प्रमाणं परिणाहतः :: ४.२६१
चतुर्हस्ता घटतुला पादौ चापि प्रकीर्तितौ :
पादयोरन्तरं हस्तो भवेदध्यर्धमेव च :: ४.२६२
ऋजुवी घटतुला कार्या खादिरी तैन्दुकापि वा :
चतुरस्रा त्रिभिः स्थानैर्घटकर्कटकादिभिः :: ४.२६३
खादिरं कारयेत्तं च निर्व्रणं शुष्कवर्जितम् :
शांशपं तदभावे तु शालं वा कोटरैर्विना :: ४.२६४
अेवंविधानि काष्ठानि घटार्थं परिकल्पयेत् :
सभाराजकुलद्वारे सुरायतनचत्वरे :: ४.२६५
निखेयो निश्चलः कार्यः गन्धमाल्यानुलेपनः :
दध्यक्षतहविर्गन्धकृतपावनमंगलः :: ४.२६६
रक्षार्थमाहूतैर्लोके लोकपालैरधिष्ठितः :
सर्वदा स तु देयः स्यात्सर्वलोकस्य पश्यतः :: ४.२६७
अहोरात्रोषिते स्नाते आर्द्रवाससि मानवे :
पूर्वाह्णे सर्वदिव्यानां प्रदानमनुकीर्तितम् :: ४.२६८
शिरोपस्थायिनि नरे अभियोक्तर्युपस्थिते :
दिव्यप्रदानं विहितमन्यत्र नृपहिंसनात् :: ४.२६९
अशिरांस्यपि दिव्यानि राजा भृत्येषु दापयेत् :
अभियोगाभियुक्तानामन्येषां तु यथाक्रमम् ⊗ :: ४.२७०
शिक्यत्रयं समासज्य घटकर्कटयोर्दृढम् :
अेकत्र शिक्ये पुरुषमन्यत्र तुलयेच्छिलाम् :: ४.२७१

⊗ V.M. reads २७० ab राजभिः शंकितानां च निर्दिष्टानां च दस्युभिः :
आत्मशुद्धिपराणां च दिव्यं देयं शिरो विना ::

धारयेदुत्तरे पार्श्वे पुरमं दक्षिणे शिलाम् :
पिटिकां पुरयेत्तस्मिन्निष्टिकालोष्ठपांसुभि: :: ४.२७२
प्रग्रमारोपणे ग्राह्यं प्रमाणं निपुणै: सह :
तुलाशिलाभ्यां तुल्यं च तोरणं न्यस्तलक्षणम् :: ४.२७३
सुवर्णकारा वणिज: कुशला: कांस्यकारका: :
अवेक्षेरन् घटतुलां तुलाधारणकोविदा: :: ४.२७४
तुलयित्वा नरं पूर्वं चिह्नं कृत्वा घटस्य च :
कक्षास्थाने यदा तुल्यमक्तार्यं ततो घटात् :: ४.२७५
समयै: परिगृह्याथ पुनरारोपयेन्नरम् :
निवति वृष्टिरहिते शिरस्योरोप्य पत्रकम् :: ४.२७६
तस्मिन्नेव समारूढे धृत्वा कक्षां द्विजो वदेत् :
धर्मपर्यायवचनैर्घट इत्यभिधीयसे :: ४.२७७
त्वं वेत्सि सर्वभूतानां पापानि सुकृतानि च :
व्यवहाराभिशस्तोऽयं मानवस्तुल्यते त्वया :: ४.२७८
देवासुरमनुष्याणां सत्ये त्वमतिरिच्यसे :
त्वं तुले सत्यधामासि पुरा देवैर्विनिर्मिता :: ४.२७९
तत्सत्यं वद कल्याणि संशयान्मां विमोचय :
यद्यहं पापकर्मास्मि तदा त्वं मामधो नय :: ४.२८०
शुद्धं चैव विजानासि तत ऊर्ध्वं गृहाण माम् :
तदेनं संशयारूढं धर्मतस्त्रातुमर्हसि :: ४.२८१
इत्यादिकृतश्रावणं लोकपालै: सुरैश्च वै :
पुरमं पुनरारूढं समुद्धृत्य निरीक्षयेत् :: ४.२८२
तुलितो यदि वर्धेत स शुद्ध: स्यान्न संशय: :
समो वा हीयमानो वा अविशुद्धो भवेन्नर: :: ४.२८३
कक्षाच्छेदे तुलाभंगे घटकर्कटयोस्तथा :
रज्जुच्छेदे ऽक्षभंगे च मूर्तित: शुद्धिमादिशेत् :: ४.२८४
अत: परं प्रवक्ष्यामि विधिमग्नेस्तथोत्तमम् :
द्वात्रिंशदंगुलं प्राहुर्मण्डलान्मण्डलान्तरम् :: ४.२८५
अष्टभिर्मण्डलैरेवमंगुलानां शतद्वयम् :
षट्पंचाशत्समधिकं भूमेस्तु परिकल्पना :: ४.२८६

सप्ताश्वत्थस्य पत्राणि अभियुक्तस्य हस्तयो: :
कृत्वा न्यसेत्तु पत्राणि सप्तभि: सूत्रतन्तुभि: :: ४.२८७
जात्यैव लोहकारो य: कुशलश्चाग्निकर्मणि :
दृष्टयोगश्चान्यत्रापि तेनायोऽग्नौ प्रतापयेत् :: ४.२८८
अग्निवर्णमय:पिण्डं सस्फुलिंगं सुरक्तिकम् :
पंचाशत्पलिकं भूय: कृत्वैवं तु शुचिर्द्विज: :: ४.२८९
तृतीयातापतप्तं तु ब्रूयात्सत्यपुरस्कृत: :
श्रूयतां मानवो धर्मो लोकपालैरधिष्ठित: :: ४.२९०
त्वमग्ने सर्वदेवानां पवित्रं परमं मुखम् :
त्वमेतत्सर्वभूतानां हृदिस्थो वेत्सि चेष्टितम् :: ४.२९१
सत्यानृते च जिह्वायास्त्वत्त: समुपजायते :
वेदादिभिरिदं प्रोक्तं नान्यथा कर्तुमर्हसि :: ४.२९२
अनेनायमिदं प्रोक्तो मिथ्या चेदमथाब्रवीत् :
सर्वथा च यथा मिथ्या तथाग्निं धारयाम्यहम् :: ४.२९३
अेष धारयते च त्वां सत्येनानेन मानव: :
तदस्य सत्यवाक्यस्य शीतो भव हुताशन :: [illegible]
मृषावाक्यस्य पापस्य दह हस्तौ तु शापित: :: ४.२९४
अमुमर्थं च पत्रस्थं अभिलिख्य यथार्थत: :
श्रावितस्य च तन्मूर्ध्नि तस्य देयं यथाक्रमम् :: ४.२९५
स्नातश्च मण्डलस्थस्य तत: संगृह्य पावकम् :
स्थित्वैकस्मिन् ततोऽन्यानि व्रजेत्सप्त त्वजिह्मग: :: ४.२९६
पातयेन्न तमप्राप्य या भूमि: परिकल्पिता :
असंभ्रान्त: शनैर्गच्छेदक्रुद्ध: सोऽनलं प्रति :: ४.२९७
यस्तु पातयते त्रासाद्दग्धो वा न विभाव्यते :
पुनस्तं धारयेदग्निं स्थितिरेव दृढीकृता :: ४.२९८
न मण्डलमतिक्रामेन्न चार्वागर्पयेत्पदम् :
मण्डलं चाष्टमं गत्वा ततोऽग्निं विसृजेन्नर: :: ४.२९९
अनेन विधिना कार्यो हुताश: समय: सदा :
ऋते ग्रीष्मात्सदा युक्त: कालेऽन्यत्र सुशीतले :: ४.३००

हस्तक्षतेषु सर्वेषु कुर्यात्काकपदानि च :
तान्येव पुनरवेक्षेद्धस्तौ बिन्दुविचित्रितौ :: ४.३०१
यत्पुनर्न विभाव्येते दग्धावेतौ करौ तदा :
व्रीहीन्प्रगृह्य यत्नेन सप्तवारांस्तु मर्दयेत् :: ४.३०२
मर्दितैर्यदि नो दग्धः सभ्यैरेवं विनिश्चितः :
मोच्यः स शुद्धः सत्कृत्य दग्धो दण्ड्यो यथाक्रमम् :: ४.३०३
अतः परं प्रवक्ष्यामि पानीयविधिमुत्तमम् :
हैमन्तकालादन्यत्र शिशिराच्च यथाक्रमम् :: ४.३०४
नदीषु नातिवेगासु सागरेषु वहेषु च :
ह्रदेषु देवखातेषु तडागेषु सरःसु च :: ४.३०५
नातिक्रूरेण धनुषा प्रेषयित्वा शरत्रयम् :
पानीयमज्जनं कार्यं कियत्तश्च विपश्चिता :: ४.३०६
क्रूरं धनुं सप्तशतं मध्यमं षट्शतं स्मृतम् :
मन्दं पंचशतं ज्ञेयं शेष ज्ञेयो धनुर्विधिः :: ४.३०७
नाभिमात्रे जले स्थाप्यः पुरुषस्तम्भवद्बली :
तस्योरू संप्रगृह्याथ निमज्जेदभिशस्तवान् :: ४.३०८
शरप्रक्षेपणात्स्थानाद्युवा जवसमन्वितः :
गच्छेत्परमया शक्त्या यत्र स्यान्मध्यमः शरः :: ४.३०९
मध्यमं तु शरं गृह्य पुरुषोऽन्यस्तथाविधः :
प्रत्यागच्छेत वेगेन यतः स पुरुषो गतः :: ४.३१०
आगतश्च शरग्राही न पश्यति यदा जले :
अन्तर्जलं यदा सम्यक् तदा शुद्धिं विनिर्दिशेत् :: ४.३११
अन्यथा न विशुद्धः स्यादेकांगस्यापि दर्शनात् :
स्थानाद्वान्यत्र गमनाद् यस्मिन्पूर्वं निवेशितः :: ४.३१२
न मज्जनीयं स्त्रीबालं धर्मशास्त्रविशारदैः :
रोगिणश्चापि वृद्धाश्च पुमांसो ये च दुर्बलाः :: ४.३१३
निरुत्साहान् रुजाक्लिष्टान् आर्तांश्च न निमज्जयेत् :
सद्यो म्रियन्ते मज्जन्तः स्वल्पप्राणा हि ते स्मृताः :: ४.३१४
साहसादागतानेतान्नैव तोये निमज्जयेत् :
न चापि साधयेदग्निं न विषेण विशोधयेत् :: ४.३१५

सत्यानृतविभागस्य तोयाग्नी स्पष्टकृत्तमौ :
अद्भ्यश्चाग्निरभूद् यस्मात्तस्मात्तोये विशेषत: :: ४.३१६
क्रियते धर्मतत्वज्ञैर्दूषितानां विशोधनम् :
तस्मात्सत्येन भगवन् जलेश त्रातुमर्हसि :: ४.३१७
अत: परं प्रवक्ष्यामि विषस्य विधिमुत्तमम् :
यस्मिन्काले यथा प्रोक्तं यादृशं परिकीर्तितम् :: ४.३१८
यवमात्रा समुद्दिष्टा धर्मतत्वार्थदर्शिभि: :
तोलयित्वा शरत्काले देयमेतद्विधमागमे :: ४.३१९
नापराह्णे न मध्याह्ने न संध्यायां च धर्मवित् :
शरद्ग्रीष्मवसन्तेषु वर्षासु च विवर्जयेत् :: ४.३२०
भग्नं च चारितं चैव धूपितं मिश्रितं तथा :
कालकूटमलाबुं च विषं यत्नेन वर्जयेत् :: ४.३२१
शार्ङ्गं हैमवतं शस्तं गन्धवर्णरसान्वितम् :
अकृत्रिममसंमूढममन्त्रोपहतं च यत् :: [illegible]
अभिन्नं तत्प्रदात०यं क्षत्रविट्शूद्रयोनिषु :: ४.३२२
विषस्य पलषड्भागाद्भागो विंगतिमस्तु य: :
तमष्टभागहीनं तु शोध्ये दद्यात् घृतप्लुतम् :: ४.३२३
वर्षे चतुर्यवा मात्रा ग्रीष्मे पंच यवा स्मृता: :
हेमन्ते सप्त वाऽष्टौ वा शरद्यल्पास्ततोऽपि हि :: ४.३२४
त्वं विष ब्रह्मण: पुत्र: सत्यधर्म०यवस्थित: :
शोधयैनं नरं पापात्सत्येनास्यामृतीभव :: ४.३२५
छायानिवेशितो रक्ष्यो दिनशेषमभोजन: :
विषवेगक्लमातीत: शुद्धोऽसौ मनुरब्रवीत् :: ४.३२६
अत: परं प्रवक्ष्यामि कोशस्य विधिमुत्तमम् :
शास्त्रविद्भिर्यथा प्रोक्तं सर्वकालाविरोधनम् :: ४.३२७
पूर्वाह्णे सोपवासस्य स्नातस्यार्द्रपटस्य च :
सशूकस्या०यसनिन: कोशपानं विधीयते :: [illegible]
इच्छत: श्रद्दधानस्य देवब्राह्मणसन्निधौ :: ४.३२८
यद्भक्त: सोऽभियुक्त: स्यात्तद्दैवत्यं तु पाययेत् :
अभ्यर्च्य देवतां स्नाप्य जलस्य प्रसृतित्रयम् :: ४.३२९

सप्ताहाभ्यन्तरे यस्य द्विसप्ताहेन वाऽशुभम् :
रोगोऽग्निर्ज्ञातिमरणमर्थभ्रंशो धनक्षयः :: ४.३३०
अपूर्वं यस्य द्विसप्ताहाद्वैकृतं सुमहद् भवेत् :
नाभियोज्यः स विदुषा कृतकालव्यतिक्रमात् :: ४.३३१
महापराधे निर्धर्मे कृतघ्ने क्लीबकुत्सिते :
नास्तिकव्रात्यदासेषु कोशपानं विवर्जयेत् :: ४.३३२
यथोक्तेन विधिना पंचदिव्यानि धर्मवित् :
दत्वा राजाभियुक्तानां प्रेत्य चेह च नन्दति :: ४.३३३
ब्राह्मणस्य घटो देयः क्षत्रियस्याग्निरुच्यते :
वैश्ये तु सलिलं देयं विषं शूद्रे प्रदापयेत् :: ४.३३४
न ब्राह्मणे विषं दद्यात् [illegible] न लोहं क्षत्रियो हरेत् :
कोशान्तानि तुलादीनि गुर्वर्थेषु प्रदापयेत् :: ४.३३५
शतार्धं दापयेच्छुद्धावशुद्धो दण्डभाग्भवेत् :: ४.३३६
तण्डुलानां प्रवक्ष्यामि विधिं भक्षणचोदितम् :
चौर्ये तु तण्डुला देया नान्यत्रेति विनिश्चयः :: ४.३३७
तण्डुलान् कारयेत् शुक्लान् शालेर्नान्यस्य कस्यचित् :
मृण्मये भाजने कृत्वा भास्करस्याग्रतः शुचिः :: ४.३३८
स्नानोदकेन संपृक्तान्रात्रौ तत्रैव वासयेत् :
प्रभातायां रजन्यां तु त्रिःकृत्वा प्राङ्मुखाय च :: ४.३३९
स्नाताय सोपवासाय दद्यादेवार्चकः स्वयम् :
स्वयं कार्यं समुद्दिश्य सत्यासत्यपरीक्षणे :: ४.३४०
तण्डुलान् भक्षयित्वा तु पत्रे निष्ठीवयेत्ततः :
अश्वत्थपत्राभावे तु भूर्जपत्रे ततः स्मृतम् :: ४.३४१
दृश्यते शोणितं यस्य दन्तजालं च सीदति :
गात्रं च कम्पते यस्य तमशुद्धं विनिर्दिशेत् :: ४.३४२
अतः परं प्रवक्ष्यामि तप्तमाषकलक्षणम् :
शुभाशुभपरीक्षार्थं ब्रह्मणाभिहितं स्वयम् :: ४.३४३
सौवर्णे राजते पात्रे आयसे मृण्मयेऽपि वा :
क्षिप्रं घृतमुपादाय तदग्नौ स्थापयेच्छुचिः :: ४.३४४

सौवर्णीं राजसीं ताम्रीमायसीं वा सुशोभिताम् :
सलिलेनासकृद्धौतां निक्षिपेत्तत्र मुद्रिकाम् :: ४.३४५
भ्रममुत्पतितामन्त: स न स्पर्श: सुभीषण: :
ततस्त्वनेन मन्त्रेण घृतं तदभिमन्त्रयेत् :: ४.३४६
परं पवित्रममृतं घृत त्वं यज्ञकर्मसु :
दहाग्ने यद्यं पापो हिमशीतं शुचौ भव :: ४.३४७
प्रदेशिन्यक्षता यस्य संस्पृष्टायां परीक्षणे :
यदि विस्फोटका न स्यु: शुद्धोऽसावन्यथा न हि :: ४.३४८

---

(६) Nāradīyamanusaṃhitā

This is the chapter on ordeal found in the Nepalese manuscript (held to be spurious by Dr. Jolly). It is included in NMS edited by Sāmbaśiva Śāstri after the section called Prakīrṇaka. Also vide Dr. Chintamani's article on Nāradasmṛti in C. Kunhan Raja presentation Volume, pp. 153-196

संशयस्थास्तु ये केचिन्महापातकिनश्च ये :
अभिशस्ता परैश्चापि ते शोध्या: संशयैरिह :: १
घटोऽग्निरुदकं चैव विषं कोशश्च पंचम: :
पंचैतान्याह दिव्यानि दूषितानां विशोधने :: २
संदिग्धेऽर्थेऽभिशस्तानां परीक्षार्थं महात्मना :
नारदेन पुरा प्रोक्ता: सत्यानृतविभाजिका: :: ३
कारयेत चतुर्हस्तां समां लक्षणलक्षिताम् :
तुलां काष्ठमयीं राजा शिक्यप्रान्तावलम्बिनीम् :: ४
दक्षिणोत्तरसंस्थानावुभावेकत्र संगतौ :
स्तम्भौ कृत्वा समे देशे तयो: संस्थापयेत्तुलाम् :: ५
आयसेन तु पाशेन मध्ये संगृह्य धर्मवित् :
योजयेत सुसंयत्तां तुलां प्राग्रपरायताम् :: ६
वादिनोऽनुमतेनैनां कारयेन्नान्यथा नृप: :
तोलयित्वान्तरं पूर्वं चिह्नं कृत्वा घटस्य तु :: ७

तुलितो [illegible] यदि वर्धेत स विशुद्धो हि धर्मतः :
समो वा हीयमानो वा न विशुद्धो भवेन्नरः :: ८
धर्मपर्यायवचनैर्घट इत्यभिधीयते :
त्वं वेत्सि सर्वभूतानां पापानि सुकृतानि च :: ९
त्वमेव देव जानीषे न विदुर्यानि मानवाः :
०यवहाराभिशस्तोऽयं मानुषः शुद्धिमिच्छति ::
तदेनं संशयारूढं धर्मतस्त्रातुमर्हसि :: १०
अतः परं प्रवक्ष्यामि लोहस्य विधिमुत्तमम् :
द्वात्रिंशदंगुलाख्यं तु मण्डलान्मण्डलान्तरम् :: ११
मण्डलस्य प्रमाणं तु कुर्यात्तत्पदसंमितम् :
अष्टाभिर्मण्डलैरेवमंगुलानां शतद्वयम् :: १२
चतुर्विंशत्समाख्यातं भूमेस्तु परिकल्पनम् :
मण्डलैस्तु ततः कॢप्तैः सोपवासः शुचिर्नरः :: १३
सवासा [illegible] जलमाप्लुत्य त्वार्द्रकेशः समाहितः :
सप्ताश्वत्थस्य पत्राणि तथा सौत्राणि तन्तवः :: १४
हुताशतप्तं लोहस्य पंचाशत्पलिकं समम् :
हस्ताभ्यां पिण्डमादाय व्रजेत् सप्त शनैः शनैः :: १५
न मण्डलमतिक्रामेन्नाप्यर्वाक् स्थापयेत्पदम् :
न पातयेत्तमप्राप्तो यावद्भूः परिकल्पिता :: १६
भयात्पातयते यस्तु दग्धो वा न विभाव्यते :
पुनस्तं हारयेल्लोहं स्थितिरेवं दृढीकृता :: १७
तीत्वर्निन विधानेन मण्डलानि कृतानि च :
न दग्धः सर्वथा यस्तु स विशुद्धो भवेदिह :: १८
अनेन विधिना कार्यो हुताशसमयः सदा :
त्वमेव सर्वभूतानामन्तश्चरसि नित्यशः :: १९
प्रच्छन्नानि मनुष्याणां पापानि सुकृतानि च :
त्वमेव देव जानीषे न विदुर्यानि मानवाः :: २०
०यवहाराभिशस्तोऽयं मानुषः शुद्धिमिच्छति :
तदेनं संशयारूढं धर्मतस्त्रातुमर्हसि :: २१

अतः परं प्रवक्ष्यामि पानीयविधिमुत्तमम् :
नातिक्रूरेण धनुषा प्रेरयित्वा शरत्रयम् :: २२
पानीये मज्जयेद्यस्तु शंकायां प्रतिवर्तते :
मध्यमस्तु शरो यः स्यात् पुरुषेण बलीयसा :: २३
प्रत्यानीते तु तेनाथ तस्य शुद्धिर्भविष्यति ::२४
स्त्रियस्तु न बलात्कार्या न पुमांसोऽतिदुर्बलाः :
भीरुत्वाद्योषितो मृत्युर्निरुत्साहतया कृशाः :: २५
वारिमध्ये मनुष्यस्य अंगं यदि न दृश्यते :
अतोऽन्यथा न शुद्धः स्यादेकांगमपि दर्शयन् :: २६
स्थानादन्यत्र वा गच्छन् यस्मिन् पूर्वं निवेशितः :
तोयमध्ये मनुष्यस्य गृहीत्वोरुं सुसंयतः :: [illegible]
लग्नस्तु निश्चलस्तिष्ठेद्यावत् प्राप्तस्तु सायकः :: २७
आनीतं तु शरं दृष्ट्वा जलादुत्थाय प्राङ्मुखः :
प्रणिपत्य नृपं गच्छेत् सर्वांश्चैव सभासदः :: २८
त्वमम्भः सर्वभूतानामन्तश्चरसि नित्यशः :
प्रच्छन्नानि मनुष्याणां पापानि सुकृतानि च :: २९
त्वमेव देव जानीषे न विदुर्यानि मानवाः :
व्यवहाराभिशस्तोऽयं मानुषः शुद्धिमिच्छति :: ३०
तदेनं संशयारूढं धर्मतस्त्रातुमर्हसि :: ३१
अतः परं प्रवक्ष्यामि विषस्य विधिमुत्तमम् :
अपराह्णे न मध्याह्ने न संध्यायां तु धर्मवित् ::
शरद्ग्रीष्मवसन्तेषु वर्षासु च विवर्जयेत् :: ३२
भग्नं च वारितं चैव धूपितं मिश्रितं तथा :
कालकूटं मलं चैव विषं यत्नेन वर्जयेत् :: ३३
शार्ङ्गं हैमवतं शस्तं रूपवर्णरसान्वितम् :
महादोषवते दद्याद् राजा तत्वबुभुत्सया :: ३४
न वृद्धातुरबालेषु न च स्वल्पापराधिषु :: ३५
विषस्य पलषड्भागो भागो विंशतिमस्तु यः :
तदष्टभागशुद्धं तु शोध्ये दद्याद् घृतप्लुतम् :: ३६

यथोक्तेन विधानेन विद्वान् स्पृष्ट्वानुमोदित : :
सोपवासस्तु खादेत देवब्राह्मणसन्निधौ :: ३७
विषवेगक्रमापेतं सुखेन यदि जीवति :
विशुद्धमिति तं ज्ञात्वा राजा सत्कृत्य मोक्षयेत् :: ३८
अत : परं प्रवक्ष्यामि कोशस्य विधिमुत्तमम् :
मध्याह्ने सोपवासस्य स्नातस्यार्द्राम्बरस्य च :: ३९
न शूद्रस्या०यसनिन : कोशपानं विधीयते :
यद्भक्त : सोऽभियुक्त : स्यात्तदैवत्यं तु प्राङ्मुख : :: ४०
प्रत्युच्चार्य ततोऽध्वर्यास्यं पाययेत्प्रसृतित्रयम् :
द्विसप्ताहान्तरात्तस्य त्रिसप्ताहेन वा शुभ : :: ४१
प्रत्यात्मिकं तु दृश्येत सैव तस्य विभावना :
ऊर्ध्वं त्रिसप्तदिवसाद् वैकृतं सुमहद्यदि ::
नाभियोज्य : स विदुषा कृतकाल०यतिक्रमात् :: ४२
महापराधे निर्दोषे कृतघ्ने क्लीबकुत्सिते :
नास्तिकव्रात्यबालेषु कोशपानं विवर्जितम् :: ४३
चराचरस्य जगतो जलेश प्राणधारणम् :
मानुषोऽयं त्वया देव धर्मत : शुद्धिमिच्छति :: ४४
अद्भ्यश्चाग्निरभूद्यस्मादतस्तोये विशेषत : :
तस्मात्सत्येन भगवज्जलेश त्रातुमर्हसि :: ४५
यथोक्तेन विधानेन पंच दि०यानि धर्मवित् :
ददद् राजाभिशस्तेभ्य : प्रेत्य चेह च नन्दति :: ४६

---

(७) Bṛhaspati

१) द्विप्रकारा क्रिया प्रोक्ता मानुषी दैविकी तथा :
अकैकानेकधा भिन्ना ऋषिभिस्तत्ववेदिभि : :: अप २.२२,०यप्र.८१
२) साक्षिलेख्यानुमानं च मानुषी त्रिविधा स्मृता :
घटाद्या धर्मजान्ता तु दैवी नवविधा क्रिया :: अप २.२२,०यप्र.८१

३) साक्षी द्वादशभेदस्तु लिखितं त्वष्टधा स्मृतम् :
अनुमानं त्रिधा प्रोक्तं नवधा दैविकी क्रिया :: व्यप्र.८१

४) वाक्पारुष्ये महीवादे निषिद्धा दैविकी क्रिया :
प्रदातव्या प्रयत्नेन साहसेषु चतुर्ष्वपि :: अप.२.२२

५) ऋणादिकेषु कार्येषु कल्पयेन्मानुषीं क्रियाम् :
नृपद्रोहे साहसे च कल्पयेद्दैविकीं क्रियाम् :: व्य.क.९१

६) मणिमुक्ताप्रवालानां कूटहृत्पाशहारकः :
हिंसकोऽन्त्यांगनासेवी परीक्ष्यः शपथैः सदा :: व्यप्र.८४

७) महापापाभिशापेषु निक्षेपहरणे तथा
दिव्यैः कार्यं परीक्षेत राजा सत्स्वपि साक्षिषु :: व्य.प्र.८४

८) लिखिते साक्षिवादे च सन्दिग्धे जायते यदि :
अनुमाने च सम्भ्रान्ते तत्र दिव्यं विशोधनम् :: अप.२.२२

९) चिरंतनोपांशुकृते चिरनष्टेषु साक्षिषु :
प्रदुष्टेष्वनुमानेषु दिव्यैः कार्यं विशोधयेत् :: व्यप्र.८४

१०) घटोऽग्निरुदकं चैव विषं कोशश्च पंचमम् :
षष्ठं च तण्डुलाः प्रोक्तं सप्तमं तप्तमाषकः :: स्मृच.११४

११) अष्टमं फालमित्युक्तं नवमं धर्मजं तथा :
दिव्यान्येतानि सर्वाणि निर्दिष्टानि स्वयम्भुवा :: स्मृच.११४

१२) अपराधानुपूर्व्येण साध्वसाधुविवक्षया :
शास्त्रोदितेन विधिना प्रदातव्यानि नान्यथा :: व्य.क.१९८

१३) संख्या रश्मिरजोमूला मनुना समुदाहृता :
कार्षापणान्ता सा दिव्ये नियोज्या विनयेत्तथा :: अप.२.९९,स्मृच.२३६

१४) विषं सहस्रोपहृते पादोने च हुताशनः :
त्रिपादोने च सलिलं अर्धे देयो घटः सदा :: " "

१५) चतुःशताभियोगे च दातव्यस्तप्तमाषकः :
त्रिशते तण्डुला देयाः कोशश्चैव तदर्धके :: " "

१६) शते ~~हृतेऽपह्नुते~~ हृतेऽपह्नुते च दातव्यं धर्मशोधनम् :
गोचोरस्य प्रदातव्यं सभ्यैः फालं प्रयत्नतः :: " "

१७) शेषा संख्या निकृष्टानां मध्यानां द्विगुणा स्मृता :
चतुर्गुणोत्तमानां तु कल्पनीया परीक्षकैः :: " "

१८) घटेऽभियुक्तस्तुलितो हीनश्चेद्धानिमाप्नुयात् : 
तत्समस्तु पुनस्तोल्यो वर्धितो विजयी भवेत् :: अप.२.१०२,स्मृच २५९
१९) कक्षच्छेदे तुलाभंगे घटकर्कटयोस्तथा : 
रज्जुच्छेदेऽक्षभंगे वा तथैवाशुद्धिमाप्नुयात् :: अप.२.१०२,स्मृच २६०
२०) अप्सु प्रवेश्य पुरुषं प्रेषयेत्सायकत्रयम् : ०यप्र. २०६
आनीते मध्यमे बाणे मग्नांगः शुचितामियात् :: अप. २.१०९
२१) विधिदत्तं विषं येन जीर्णं मन्त्रौषधं विना : 
स शुद्धः स्यादन्यथा तु दण्ड्यो दाप्यश्च तद्धनम् :: अप.२.१११,०यप्र.२११
२२) त्रिरात्रं पंचरात्रं वा पुरुषैः स्वैरधिष्ठितम् : 
निरुद्धं चारयेत्तत्र कुहकाशंकया नृपः :: विश्व.२.११३
२३) सप्ताहाद्वा द्विसप्ताहाद्यस्यार्तिर्[illegible] न जायते : 
पुत्रदारधनानां च स शुद्धः स्यान्न संशयः :: ०यप्र. २१४
२४) सोपवासः सूर्यगृहे तण्डुलान्भक्षयेच्छुचिः : 
शुद्धः स्याच्छुक्लनिष्ठीवे विपरीते तु दोषभाक् :: ०यप्र.२१६
२५) समुद्धरेत्तैलघृतात्सुतप्तात्तप्तमाषकम् : 
अंगुष्ठांगुलियोगेन सत्यमामन्त्र्य वीतभीः :: ०यप्र.२१७
२६) आयसं द्वादशपलं घटितं फालमुच्यते : 
अष्टांगुलं भवेद्दीर्घं चतुरंगुलविस्तृतम् :: ०यप्र.२१७,स्मृच.२७९
२७) अग्निवर्णं तु तच्चोरो जिह्वया लेलिहेत्सकृत् : 
न दग्धश्चेच्छुद्धिमियादन्यथा तु स हीयते :: ०यप्र.२१८,स्मृच.२७९
२८) पत्रद्वये लेखनीयौ धर्माधर्मौ सितासितौ : 
जीवदानादिभिर्मन्त्रैर्गायत्र्याद्यैश्च सामभिः :: अप.२.११३,०यप्र.२१९
२९) आमन्त्र्य पूजयेद् गन्धैः कुसुमैश्च सितासितैः : 
अभ्युक्ष्य पंचग०येन मृत्पिण्डान्तरितौ ततः :: " "
३०) समौ कृत्वा तु तौ कुम्भे स्थाप्यौ चानुपलक्षितौ : 
ततः कुम्भात्पिण्डमेकं प्रगृह्णीताविलम्बतः :: " "
३१) धर्मे गृहीते शुद्धः स्यात्स पूज्यश्च परीक्षकैः : " "
अधर्मे संगृहीते तु दण्ड्यो निर्वास्य एव वा :: सवि. २१६
३२) सत्यं वाहनशस्त्राणि गोबीजकनकानि च : 
देवब्राह्मणपादाश्च पुत्रदारशिरांसि च :: ०यप्र.१७०

३३) स्नेहात्क्रोधाल्लोभतो वा भेदमायान्ति साक्षिण: :
विधिदत्तस्य दि०यस्य न भेदो जायते क्वचित् :: ०यप्र.१८३

४४ॻ Brhaspati on four types of Nirnaya

३४) धर्मेण ०यवहारेण चरित्रेण नृपाज्ञया :
चतुष्प्रकारोऽभिहित: सन्दिग्धेऽर्थे विनिर्णय: :: स्मृच.२१

३५) भेकैको द्विविध: प्रोक्त: क्रियाभेदान्मनीषिभि: :
अपराधानुरूपं तु दण्डं च परिकल्पयेत् :: स्मृच.२२

३६) सम्यग्विचार्य कार्यं तु युक्त्या संपरिकल्पितम् :
परीक्षितं च शपथै: स प्रोक्तो धर्मनिर्णय: :: स्मृच.२२

३७) प्रतिवादी प्रपद्येत स आद्यो धर्मनिर्णय: :
दि०यैर्विशोधित: सम्यग् द्वितीय: स अुदाहृत: :: स्मृच.२२

३८) प्रमाणनिश्चितो यस्तु ०यवहार: स अुच्यते :
वाक्छलानन्तरत्वेन द्वितीय: परिकीर्तित: :: स्मृच.२३

३९) अनुमानेन निर्णीतं चरित्रमिति कथ्यते :
देशस्थित्या द्वितीयं तु शास्त्रविद्भिरुदाहृतम् :: स्मृच.२३

४०) प्रमाणरहितो यस्तु राजाज्ञा निर्णयस्तु स: :
शास्त्ररीत्यविरोधेन तथा चान्य: परिकीर्तित: :: स्मृच.२३

४१) केवलं शास्त्रमाश्रित्य क्रियते यत्र निर्णय: :
०यवहार: स विज्ञेयो धर्मस्तेनावहीयते :: स्मृच.२४

---

(८) Kātyāyana (Ed: Dr Kane)

( अ ) Kriyāpāda.

लिखितं साक्षिणो भुक्ति: प्रमाणं त्रिविधं विदु: :
लेशोद्देशस्तु युक्ति: स्याद्दि०यानीह विषादय: :: २१४
पूर्ववादेऽपि लिखिते यथाक्षरमशेषत: :
अर्थी तृतीयपादे तु क्रियया प्रतिपादयेत् :: २१५
कार्यं हि साध्यमित्युक्तं साधनं तु क्रियोच्यते :
द्विभेदा सा पुनर्ज्ञेया दैविकी मानुषी तथा :: २१६
मानुषी लेख्यसाक्ष्यादिर्धटादिर्दैविकी मता :
संभवे साक्षिणां प्राज्ञो दैविकीं हीयते तत: :: २१७

यद्येको मानुषीं ब्रूयादन्यो ब्रूयात्तु दैविकीम् :
मानुषीं तत्र गृह्णीयान्न तु दैवीं क्रियां नृप: :: २१८
यद्येकदेशव्याप्ताऽपि क्रिया विद्येत मानुषी :
सा ग्राह्या न तु पूर्णाऽपि दैविकीं वदतां नृणाम् ::२१९
पंचप्रकारं दैवं स्यान्मानुषं त्रिविधं स्मृतम् :: २२०
क्रियां बलवतीं मुक्त्वा दुर्बलां योऽवलम्बते :
स जयेऽवधृते सभ्यै: पुनस्तां नाप्नुयात्क्रियाम् :: २२१
सारभूतं पदं मुक्त्वा असाराणि बहून्यपि :
संसाधयेत्क्रिया या तु तां जह्यात्सारवर्जिताम् ::
पक्षद्वयं साधयेद्या तां जह्याद्दूरत: क्रियाम् :: २२२
क्रिया न दैविकी प्रोक्ता विद्यमानेषु साक्षिषु :
लेख्ये च सति वादेषु न दिव्यं न च साक्षिण: :: २२३
कालेन हीयते लेख्यं दूषितं न्यायतस्तथा :
अलेख्यसाक्षिके दैवीं व्यवहारे विनिर्दिशेत् ::
दैवसाध्ये पौरुषेयीं न लेख्यं वा प्रयोजयेत् :: २२४
पूगश्रेणिगणादीनां या स्थिति: परिकीर्तिता :
तस्यास्तु साधनं लेख्यं न दिव्यं न च साक्षिण: :: २२५
द्वारमार्गक्रियाभोगजलवाहादिके तथा :
भुक्तिरेव हि गुर्वी स्यान्न लेख्यं न च साक्षिण: :: २२६
दत्तादत्तेऽथ भृत्यानां स्वामिना निर्णये सति :
विक्रयादानसंबंधे क्रीत्वा धनमयच्छति :: २२७
द्यूते समाह्वये चैव विवादे समुपस्थिते :
साक्षिण: साधनं प्रोक्तं न दिव्यं न च लेख्यकम् :: २२८
प्रक्रान्ते साहसे वादे पारुष्ये दण्डवाचिके :
बलोद्भूतेषु कार्येषु साक्षिणो दिव्यमेव वा :: २२९
गूढसाहसिकानां तु प्राप्तं दिव्यै: परीक्षणम् :
युक्तिचिह्नेङ्गिताकारवाक्चक्षुश्चेष्टितै: नृणाम् :: २३०
अुत्तमेषु च सर्वेषु साहसेषु विचारयेत् :
सद्भावं दिव्यदृष्टेन सत्सु साक्षिषु वै भृगु: :: २३१

समत्वं साक्षिणां यत्र दि०यैस्तत्रापि शोधयेत् :
प्राणान्तिकविवादेषु विद्य/मानेषु साक्षिषु ::
दि०यमालम्बते वादी न पृच्छेत्तत्र साक्षिण: :: २३२
ऋणे लेख्यं साक्षिणो वा युक्तिलेशादयोऽपि वा :
दैविकी वा क्रिया प्रोक्ता प्रजानां हितकाम्यया :: २३३
चोदना-प्रतिकालं च युक्तिलेशस्तथैव च :
तृतीय: शपथ: प्रोक्त: तैर्ऋणं साधयेत्क्रमात् :: २३४
अभीक्ष्णं चोद्यमानोऽपि प्रतिहन्यान्न तद्वच: :
त्रि: चतु: पंचकृत्वो वा परतोऽर्थं समाचरेत् :: २३५
चोदना-प्रतिघाते तु युक्तिलेशै: समन्वियात् :
देशकालार्थसंबंध-परिमाणक्रियादिभि: :: २३६
युक्तिष्वप्यसमर्थासु शपथैरेव निर्णयेत् :
अर्थकालबलापेक्षैरग्न्यम्बुसुकृतादिभि: :: २३७
यत्र स्यात्सोपधं लेख्यं तद्राज्ञ: श्रावितं यदि :
दि०येन शोधयेत्तत्र राजा धर्मासनस्थित: :: २३८
वाक्पारुष्ये च भूमौ च दि०यं न परिकल्पयेत् :: २३९
स्थावरेषु विवादेषु दि०यानि परिवर्जयेत् ::
साक्षिभिर्लिखितेनार्थे भुक्त्या चैव प्रसाधयेत् :: २४०
प्रमाणैर्हेतुना वापि दि०येनैव तु निश्चयम् :
सर्वेष्वेव विवादेषु सदा कुर्यान्नराधिप: :: २४१
लिखितं साक्षिणो भुक्ति: प्रमाणं त्रिविधं स्मृतम् :
अनुमानं विदुर्हेतुं तर्कं चैव मनीषिण: :: २४२
पूर्वभावे परैणैव नान्यथैव कदाचन :
प्रमाणैर्वादिनिर्दिष्टैर्भुक्त्या लिखितसाक्षिभि: :: २४३
न कश्चिदभियोक्तारं दि०येषु विनियोजयेत् :
अभियुक्ताय दात०यं दि०यं दि०यविशारदै: :: २४४

( ब ) On ordeals

( दि०यानि तेषां च विवादपदविषयिणी ०यवस्था )

न कश्चिदभियोक्तारं दि०येषु विनियोजयेत् :
अभियुक्ताय दात०यं दि०यं दि०यविशारदै: :: ४११
पार्थिवै: शंकितानां तु तुलादीनि नियोजयेत् :
आत्मशुद्धिविधाने च न शिरस्तत्र कल्पयेत् :: ४१२
लोकापवाददुष्टानां शंकितानां च दस्युभि: :
तुलादीनि नियोज्यानि न शिरस्तत्र वै भृगु: :: ४१३
न शंकासु शिर: कोशे कल्पयेत्तु कदाचन :
अशिरांसि च दि०यानि राजभृत्येषु दापयेत् :: ४१४
शंकाविश्वाससंधाने विभागे रिक्थिनां सदा :
क्रियासमूहकर्तृत्वे कोशमेव प्रदापयेत् :: ४१५
दत्तस्यापह्नवो यत्र प्रमाणं तत्र कल्पयेत् :
स्तेयसाहसयोर्दि०यं स्वल्पेऽप्यर्थे प्रदापयेत् :: ४१६
सर्वद्र०यप्रमाणं तु ज्ञात्वा हेम प्रकल्पयेत् :
हेमप्रमाणयुक्तं तु तदा दि०यं नियोजयेत् :: ४१७
ज्ञात्वा संख्यां सुवर्णानां शतनाशे विषं स्मृतम् :
अशीतिस्तु विनाशे वै दद्याच्चैव हुताशनम् :: ४१८
षष्ट्या नाशे जलं देयं चत्वारिंशति वै घटम् :
विंशद्दशविनाशे वै कोशपानं विधीयते :: ४१९
पंचाधिकस्य वा नाशे तदर्धार्धस्य तण्डुला: :
तदर्धार्धस्य नाशे तु स्पृशेत्पुत्रादिमस्तकम् :: ४२०
तदर्धार्धस्य नाशे तु लौकिकाश्च क्रिया: स्मृता: :
अेवं विचारयन्राजा धर्मार्थाभ्यां न हीयते :: ४२१

( दि०यानामर्थिप्रत्यर्थिजातिशिल्पानुसारिण्यो ०यवस्था: )

राजन्येऽग्निं, घटं विप्रे, वैश्ये तोयं, नियोजयेत् :
सर्वेषु सर्वदि०यं वा विषं वर्ज्यं द्विजोत्तमे :: ४२२
गोरक्षकान्वाणिजकांस्तथा कारुकुशीलवान् :
प्रेष्यान्वार्धुषिकांश्चैव ग्राहयेच्छूद्रवद्द्विजान् :: ४२३
न लोहशिल्पिनामग्निं, सलिलं नाम्बुसेविनाम् :
मन्त्रयोगविदां चैव विषं दद्याच्च न क्वचित् ::
तण्डुलैर्न नियुंजीत व्रतिनं मुखरोगिणम् :: ४२४

कुष्ठिनां वर्जयेदग्निं सलिलं श्वासकासिनाम् :
पित्तश्लेष्मवतां नित्यं विषं तु परिवर्जयेत् :: ४२५
मद्यपस्स्त्री०यसनिनां कितवानां तथैव च :
कोश: प्राज्ञैर्न दात०यो ये च नास्तिकवृत्तय: :: ४२६
मातृपितृद्विजगुरुबालस्त्रीराजघातिनाम् :
महापातकयुक्तानां नास्तिकानां विशेषत: :: ४२७
लिंगिनां प्रशठानां तु मन्त्रयोगक्रियाविदाम् :
वर्णसंकरजातानां पापाभ्यासप्रवर्तिनाम् :: ४२८
अेतेष्वेवाभियोगेषु निन्द्येष्वेव च यत्नत: :
दि०यं प्रकल्पयेन्नैव राजा धर्मपरायण: :: ४२९
अेतैरेव नियुक्तानां साधूनां दि०यमर्हति :
नेच्छन्ति साधवो यत्र तत्र शोध्या स्वकैर्नरै: :: ४३०
महापातकयुक्तेषु नास्तिकेषु विशेषत: :
न देयं तेषु दि०यं तु पापाभ्यासरतेषु च :: ४३१
अेषु वादेषु दि०यानि प्रतिषिद्धानि यत्नत: :
कारयेत्सज्जनैस्तानि नाभिशस्तं त्यजेन्मनु: :: ४३२
अस्पृश्याधमदासानां म्लेच्छानां पापकारिणाम् :
प्रातिलोम्यप्रसूतानां निश्चयो न तु राजनि ::
तत्प्रसिद्धानि दि०यानि संशये तेषु निर्दिशेत् :: ४३३

( दि०यदेशा: )

इन्द्रस्थानेऽभिशस्तानां महापातकिनां नृणाम् :
नृपद्रोहे प्रवृत्तानां राजद्वारे प्रयोजयेत् :: ४३४
प्रातिलोम्यप्रसूतानां दि०यं देयं चतुष्पथे :
अतोऽन्येषु सभामध्ये दि०यं देयं विदुर्बुधा: :: ४३५
कालदेशविरोधे तु यथायुक्तं प्रकल्पयेत् :
अन्येन हारयेद्दि०यं विधिरेष विपर्यये :: ४३६
अदेशकालदत्तानि बहिर्वासकृतानि च :
०यभिचारं सदार्थेषु कुर्वन्तीह न संशय: :: ४३७
साधयेत्तत्पुन: साध्यं ०याघाते साधनस्य हि :
दत्तान्यपि यथोक्तानि राजा दि०यानि वर्जयेत् ::
मूर्खैर्लुब्धैश्च दुष्टैश्च पुनर्देयानि तानि वै :: ४३८

तस्माद्यथोक्तविधिना दिव्यं देयं विशारदैः :
अयथोक्तप्रयुक्तं तु न शक्तं तस्य साधने :: ४३९
शिक्यच्छेदे तुलाभंगे तथा चापि गुणस्य वा :
शुद्धेस्तु संशये चैव परीक्षेत पुनर्नरम् :: ४४०

( अग्निविधिः )

प्रस्खलत्यभियुक्तश्चेत्स्थानादन्यत्र दह्यते :
न दग्धं तु विदुर्देवास्तस्य भूयोऽपि दापयेत् :: ४४१

( उदकदिव्यविधिः )

शरांस्त्वनायसैरग्रैः प्रकुर्वीत विशुद्धये :
वेणुकाण्डमयांश्चैव क्षेप्ता च सुदृढं क्षिपेत् :: ४४२
क्षिप्ते तु मज्जनं कार्यं गमनं समकालिकम् :
गमने त्वागमः कार्यः पुमानन्यो जले विशेत् :: ४४३
शिरोमात्रं तु दृश्येत न कर्णौ नापि नासिका :
अप्सु प्रवेशने यस्य शुद्धं तमपि निर्दिशेत् :: ४४४
निमज्ज्योत्प्लवते यस्तु दृष्टश्चेत्प्राणिभिर्नरः :
पुनस्तत्र निमज्जेत्स देशचिह्नविभाविते :: ४४५

( विषदिव्यविधिः )

अजाशृंगनिभं श्यामं सुपीनं(तं) शृंगसंभवम् :
भंगे च शृंगवेराभं ख्यातं तच्छृंगिणां विषम् :: ४४६
रक्तं तदसितं कुर्यात्कठिनं चैव तत्क्षणात् :
अनेन विधिना ज्ञेयं दिव्यं दिव्यविशारदैः :: ४४७
वत्सनाभनिभं पीतं वर्णज्ञानेन निश्चयः :
शक्तिशंखाकृतिभंगे विद्यात्तद्वत्सनाभकम् :: ४४८
मधुक्षीरसमायुक्तं स्वच्छं कुर्वीत तत्क्षणात् :
बाह्यमेव समाख्यातं लक्षणं धर्मसाधकैः :: ४४९
पूर्वाह्णे शीतले देशे विषं दद्यात्तु देहिनाम् :
घृतेन योजितं श्लक्ष्णं पिष्टं त्रिंशद्गुणेन तु :: ४५०
विषस्य पलषड्भागाद्भागो विंशति(त)मस्तु यः :
तमष्टभागहीनं तु शोध्ये देयं घृताप्लुतम् :: ४५१

( कोशदि०यविधिः )

स्वल्पेऽपराधे देवानां स्नापयित्वायुधोदकम् :
पाययो विकारे चाशुद्धो नियम्यः शुचिरन्यथा :: ४५२

( तण्डुलविधिः )

देवतास्नानपानीयदि०ये तण्डुलभक्षणे :
शुद्धनिष्ठीवनाच्छुद्धो नियम्यो शुचिरन्यथा :: ४५३
अवष्टम्भाभियुक्तस्य विशुद्धस्यापि कोशतः :
सदण्डमभियोगं च दापयेदभियोजकम् ::
दि०येन शुद्धं पुरुषं सत्कुर्याद्धार्मिको नृपः :: ४५४
शोणितं दृश्यते यत्र हनुबालं च सीदति :
गात्रं च कम्पते यस्य तमशुद्धं विनिर्दिशेत् :: ४५५
अथ दैवविसंवादात्त्रिसप्ताहात्तु दापयेत् :
अभियुक्तं तु यत्नेन तमर्थं दण्डमेव च :: ४५६
तस्यैकस्य न सर्वस्य जनस्य यदि तद्भवेत् :
रोगोऽग्निर्ज्ञातिमरणमृणं दाप्यो दमं च सः :: ४५७
क्षयातिसारविस्फोटताल्वास्थिपरिपीडनम् :
नेत्ररुग्गलरोगश्च तथोन्मादः प्रजायते ::
शिरोरुग्भुजभंगश्च दैविका ०याधयो नृणाम् :: ४५८
शतार्धं दापयेच्छुद्धं अशुद्धो दण्डभाग् भवेत् : ४५९
विषे तोये हुताशे च तुलाकोशे च तण्डुले :
तप्तमाषकदि०ये च क्रमाद्दण्डं प्रकल्पयेत् :: ४६०
सहस्रं षट्शतं चैव तथा पंच शतानि च :
चतुस्त्रिद्०येकमेवं च हीनं हीनेषु कल्पयेत् :: ४६१

( शपथविधिः )

यत्रोपदिश्यते कर्म कर्तुरंगं न तूच्यते :
दक्षिणस्तत्र विज्ञेयः कर्मणां पारगः करः :: ४६२
आचतुर्दशाद्दहनो यस्य नो राजदैविकम् :
०यसनं जायते घोरं स ज्ञेयः शपथे शुचिः :: ४६३

(९) *Pitāmaha*

१) यस्मिन् यस्मिन् विवादे तु साक्षिणां नास्ति संभव: :
साहसेषु विशेषेण तत्र दि०यानि दापयेत् :: स्मृच.२२२

२) यस्माद्देवै: प्रयुक्तानि पुष्करार्थे मनीषिभि: :
परस्परविशुद्ध्यर्थं तस्माद्दि०यानि नामत: :: स्मृच.२१४-१५,सवि १०६

३) अभियोक्ता शिर:स्थाने दि०येषु परिकीर्त्यते :
अभियुक्ताय दात०यं दि०यं श्रुतिनिदर्शनात् :: अप.२.९५

४) अवष्टम्भाभियुक्तानां घटादीनि विनिर्दिशेत् :
तण्डुलाश्चैव कोशश्च शंकास्वेतौ नियोजयेत् :: मिता.२.९५,अप.२.९५

५) शिर:स्थायिविहीनानि दि०यानि परिवर्जयेत् :
घटादीनि विषान्तानि कोश अेकोशिरा: स्मृत: :: अप.२.९६

६) अथ चेदात्मशुद्ध्यर्थं दि०यं प्रक्रमते नर: :
अशिरस्तस्य दात०यमिति शास्त्रविनिश्चय: :: अप.२.९६

७) अल्पचौर्याभिशंकायां तप्तमाषकमादिशेत् : : स्मृच.२२८

८) सहस्रे तु घटं दद्यात् सहस्रार्धे तथायसम् :
अर्धस्यार्धे तु सलिलं तस्यार्धे तु विषं स्मृतम् :: अप.२.९९,०यप्र.१७४,[illegible] दित ५८१

९) ब्राह्मणस्य घटो देय: क्षत्रियस्य हुताशन: :
[illegible] वैश्यस्य सलिलं प्रोक्तं विषं शूद्रस्य दापयेत् :: मिता.२.९८,०यप्र.१७८

१०) सर्वेषामेव वर्णानां कोशशुद्धिर्विधीयते :
सर्वाण्येतानि सर्वेषां ब्राह्मणस्य विषं विना :: मिता.२.९८,दित.५७८

११) तोयमग्निर्विषं चैव दात०यं बलिनां नृणाम् :
बालवृद्धास्त्रियश्चैव परीक्षेत घटे सदा :: अप.२.९८

१२) यो यस्य विहित: कालो विधिर्यस्य च यो यथा :
तं प्रवक्ष्यामि तत्त्वेन वादिनश्च बलाबलम् :: ०य.प्र.१८०

१३) चैत्रो मार्गशिरश्चैव वैशाखश्च तथैव च :
अेते साधारणा मासा दि०यानामविरोधिन: :: अप.२.९७,०यप्र.१८१

१४) घट: सर्वर्तुक: प्रोक्तो वाते वाति विवर्जयेत् :
अग्नि: शिशिरहेमन्तवर्षासु परिकीर्तित: :: अप.२.९७,०यप्र.१८१

१५) शरद्ग्रीष्मे तु सलिलं हेमन्ते शिशिरे विषम् :: ०यप्र.१८१
ग्रीष्मे सलिलमित्युक्तं विषं काले हिमावहे :: अप.२.९७

१६) कोशस्तु सर्वदा देयस्तुला स्यात्सार्वकालिकी :: मिता.२.९७
अ०यवस्थितमर्यादं विषं प्रावृषि जायते :: बाल.२.९७

१७) पूर्वाह्णेऽग्निपरीक्षा स्यात्पूर्वाह्णे च घटो भवेत् :
मध्याह्ने तु जलं देयं धर्मतत्त्वमभीप्सता :: अप.२.९७

१८) दिवसस्य तु पूर्वाह्णे कोशशुद्धिर्विधीयते :
रात्रौ तु पश्चिमे यामे विषं देयं सुशीतलम् :: अप.२.९७

१९) प्रत्यक्षं दापयेद्दि०यं राजा वाऽधिकृतोऽपि वा :
ब्राह्मणानां श्रुतवतां प्रकृतीनां तथैव च :: ०यप्र.१८३, दित.५७७

२०) दि०येषु सर्वदि०यानि प्राड्विवाकः समाचरेत् :
अध्वरेषु यथाध्वर्युः सोपवासो नृपाज्ञया :: मिता-अप-२.९७,०यप्र. १८३, दित.५८६

२१) तत आवाहयेद्देवान् विधिनानेन धर्मवित् :
वादित्रतूर्यघोषैश्च गन्धमाल्यानुलेपनैः ::
प्राङ्मुखः प्रांजलिर्भूत्वा प्राड्विवाकस्ततो वदेत् :: ०यप्र.१८३

२२) ऐह्येहि भगवन् धर्म अस्मिन् दि०ये समाविश :
सहितो लोकपालैश्च वस्वादित्यमरुद्गणैः ::
आवाह्य तु घटे धर्मं पश्चादंगानि विन्यसेत् :: मिता.२.१०२

२३) इन्द्रं पूर्वे तु संस्थाप्य प्रेतेशं दक्षिणे तथा :
वरुणं पश्चिमे भागे कुबेरं चोत्तरे तथा :: " "

२४) अग्न्यादिलोकपालांश्च कोणभागेषु विन्यसेत् :
इन्द्रः पीतो यमः श्यामः वरुणः स्फटिकप्रभः :: " "

२५) कुबेरस्तु सुवर्णाभो ह्यग्निश्चापि सुवर्णभः :
तथैव निर्ऋतिः श्यामो वायुर्धूम्रः प्रशस्यते :: " "

२६) ईशानस्तु भवेद्रक्त ऐवं ध्यायेत् क्रमादिमान् :
इन्द्रस्य दक्षिणे पार्श्वे वसूनावाहयेद् बुधः :: " "

#| २७) धरो/ध्रुवस्तथा सोम आपश्चैवानिलोऽनलः :
प्रत्यूषश्च प्रभातश्च वसवोऽष्टौ प्रकीर्तिताः :: " "

२८) देवेशेशानयोर्मध्ये आदित्यानां तथायनम् :
धातार्यमा च मित्रश्च वरुणोंऽशो भगस्तथा :: " "

२९) इन्द्रो मरुत्वान् पूषा च पर्जन्यो दशमः स्मृतः :
ततस्त्वष्टा ततो विष्णुरजघन्यो जघन्यजः :: " "

३०) इत्येते द्वादशादित्या नामभिः परिकीर्तिताः :
अग्नेः पश्चिमभागे तु रुद्राणामयनं विदुः :: मिता.२.१०२
३१) वीरभद्रश्च शम्भुश्च गिरिश्च महायशाः :
अजैकपादहिर्बुध्न्यः पिनाकी चापराजितः :: " "
३२) भुवनाधीश्वरश्चैव कपाली च विशाम्पतिः :
स्थाणुर्भवश्च भगवान् रुद्रास्त्वेकादश स्मृताः :: " "
३३) प्रेतेशरक्षो मध्ये च मातृस्थानं प्रकल्पयेत् :
ब्राह्मी माहेश्वरी चैव कौमारी वैष्णवी तथा ::
वाराही चैव माहेन्द्री चामुण्डा गणसंयुता :: " "
३४) निर्ऋतेरुत्तरे भागे गणेशायतनं विदुः :
वरुणस्योत्तरे भागे मरुतां स्थानमुच्यते :: " "
३५) पवनः स्पर्शनो वायुरनिलो मारुतस्तथा :
प्राणः प्राणेशजीवौ च मरुतोऽष्टौ प्रकीर्तिताः :: " "
३६) घटस्योत्तरभागे तु दुर्गामावहयेद् बुधः :
अेतासां देवतानां स्वनाम्ना पूजनं विदुः :: " "
३७) भूषावसानं धर्माय दत्त्वा चार्घ्यादिकं क्रमात् :
अर्घ्यादि पश्चादंगानां भूषान्तमुपकल्पयेत् ::
गन्धादिकां निवेद्यान्तां परिचर्यां प्रकल्पयेत् :: " "
३८) चतुर्दिक्षु तथा होमः कर्तव्यो वेदपारगैः :
आज्येन हविषा चैव समिद्भिर्होमसाधनैः ::
सावित्र्या प्रणवेनाथ स्वाहान्तेनैव होमयेत् :: " "
३९) यं चार्थमभियुक्तः स्याल्लिखित्वा तं तु पत्रके :
मन्त्रेणानेन सहितं तत्कार्यं तु शिरोगतम् :: " "
४०) आदित्यचन्द्रावनिलोऽनलश्च
द्यौर्भूमिरापो हृदयं यमश्च :
अहश्च रात्रिश्च उभे च सन्ध्ये
धर्मश्च जानाति नरस्य वृत्तम् :: " "
४१) त्रिरात्रोपोषितायैव अेकरात्रोषिताय वा :
नित्यं दिव्यानि देयानि शुचये चार्द्रवाससे :: " "
४२) इमं मन्त्रविधिं कृत्स्नं सर्वदिव्येषु योजयेत् :
आवाहनं च देवानां तथैव परिकल्पयेत् :: " "

४३) प्राङ्मुखो निश्चल: कार्य: शुचौ देशे घट: सदा :
इन्द्रस्थाने सभायां वा राजद्वारे चतुष्पथे :: मिता.२.१०२

४४) विशालामुच्छ्रितां शुभ्रां घटशालां तु कारयेत् :
यत्रस्था नोपहन्येत श्वभिश्चाण्डालवायसै: :: " "

४५) कपाटबीजसंयुक्तां परिचारकरक्षिताम् :
पानीयाग्निसमायुक्तामशून्यां कारयेन्नृप: :: " "

४६) छित्त्वा तु यज्ञियं वृक्षं यूववन्मन्त्रपूर्वकम् :
प्रणम्य लोकपालेभ्य: तुला कार्या मनीषिभि: :: " "
मन्त्र: सौम्यो वानस्पत्यश्छेदने जप्य अेव च :: " "

४७) चतुर्हस्ता तुला कार्या पादौ कार्यौ तथाविधौ :
अन्तरं तु तयोर्हस्तौ भवेदध्यर्धमेव वा :: " "

४८) हस्तद्वयं निखेयं तु पादयोरुभयोरपि :
चतुरस्रा तुला कार्या दृढा ऋजुवी तथैव च ::
कटकानि च देयानि त्रिषु स्थानेषु यत्नत: :: " "

४९) तोरणे तु तथा कार्ये पार्श्वयोरुभयोरपि :
घटादुच्चतरे स्यातां नित्यं दशभिरंगुलै: :: " "

५०) अवलम्बौ च कर्त०यौ तोरणाभ्यामधोमुखौ :
मृण्मयौ सूत्रसम्बद्धौ घटमस्तकचुम्बिनौ :: " "

५१) शिक्यद्वयं समासज्य पार्श्वयोरुभयोरपि :
प्रागग्रान् कल्पयेद्दर्भान् तत्र विप्र: समाहित: :: " "

५२) पश्चिमे तोलयेत्कर्तृनन्यस्मिन्मृत्तिकां शुभाम् :
इष्टकाभस्मपाषाणकपालास्थिविवर्जिताम् :: " "

५३) परीक्षका नियोक्त०यास्तुलामानविशारदा: :
वणिजो हेमकाराश्च कांस्यकारास्तथैव च :: " "

५४) कार्य: परीक्षकैर्नित्यमवलम्बसमो घट: :
अुदकं च प्रदात०यं घटस्योपरि पण्डितै: :: " "
यस्मिन्न प्लवते तोयं स विज्ञेय: समो घट: :: " "

५५) तोलयित्वा नरं पूर्वं पश्चात्तमवतार्य तु :
प्राङ्मुख: प्रांजलिर्भूत्वा प्राड्विवाकस्ततो वदेत् :: " "

५६) त्वं धट: ब्रह्मणा सृष्ट: परीक्षार्थं दुरात्मनाम् :
धकाराद्धर्ममूर्तिस्त्वं टकारात्कुटिलं नरम् ::
धृतो भावयसे यस्माद्धटस्तेनाभिधीयते :: मिता.२.१०२
५७) त्वं वेत्सि सर्वजन्तूनां पापानि सुकृतानि च :
त्वमेव देव जानीषे न विदुर्यानि मानवा: :: " "
५८) व्यवहाराभिशस्तोऽयं मानुषस्तोल्यते त्वया :
तदेनं संशयादस्माद्धर्मतस्त्रातुमर्हसि :: " "
५९) ज्योतिर्विद् ब्राह्मण: श्रेष्ठ: कुर्यात् कालपरीक्षणम् :
विनाड्य: पंच विज्ञेया: परीक्षाकालकोविदै: :: " "
६०) साक्षिणो ब्राह्मणा: श्रेष्ठा: यथादृष्टार्थवादिन: :
ज्ञानिन: शुचयोऽलुब्धा: नियोक्तव्या नृपेण तु :: " "
६१) तेषां वचनतो गम्य: शुद्ध्यशुद्धिविनिर्णय: :: स्मृच.२५८
६२) तुलितो यदि वर्धेत शुद्धो भवति धर्मत: :
हीयमानो न शुद्ध: स्यादेकेषां तु समोऽशुचि: :: व्यप्र.१९२
६३) अल्पदोष: समो ज्ञेयो बहुदोषस्तु हीयते :
धर्मगौरवमाहात्म्याददतिरिक्तो विशुद्ध्यति :: अप.२.१०२
६४) सद्भि: परिवृतो राजा शुद्धिमेतां प्रपूजयेत् :
ऋत्विक्पुरोहिताचार्यान् दक्षिणाभिश्च तोषयेत् :: मिता.२.१०२
६५) शुद्धं व्यंजनहेत्वर्थं पत्रं दद्यात्स्वचिह्नितम् :
अशुद्धं दण्डयित्वा तु स्वराज्याद् विप्रवासयेत् :: धर्मकोश ४८४
६६) अग्नेर्विधिं प्रवक्ष्यामि यथावच्छास्त्रचोदितम् :
कारयेन्मण्डलान्यष्टौ पुरस्तान्नवमं तथा :: मिता.अप.२.१०६
६७) आग्नेयं मण्डलं त्वाद्यं द्वितीयं वारुणं स्मृतम् :
तृतीयं वासुदैवत्यं चतुर्थं यमदैवतम् :: " "
६८) पंचमं त्विन्द्रदैवत्यं षष्ठं कौबेरमुच्यते :
सप्तमं सोमदैवत्यं सावित्रं त्वष्टमं तथा :: " "
६९) नवमं सर्वदैवत्यमिति दिव्यविदो विदु: : " "
गोमयेन कृतानि स्युरद्भि: पर्युक्षितानि च :: अप.२.१०६
७०) द्वात्रिंशदंगुलं प्राहुर्मण्डलान्मण्डलान्तरम् :
अष्टाभिर्मण्डलैरेवमंगुलानां शतद्वयम् :: " "

७१) षट्पंचाशत्समधिकं भूमेस्तु परिकल्पना :
कर्तुः पदसमं कार्यं मण्डलं तु प्रमाणतः :: मिता.अप.२.१०६

७२) मण्डले मण्डले देयाः कुशाः शास्त्रप्रचोदिताः :
विन्यसेच्च पदं कर्ता तेषु नित्यमिति स्थितिः :: " "

७३) शान्त्यर्थं जुहुयादग्नौ घृतमष्टोत्तरं शतम् :: स्मृच.२६२,०यप्र.१९५

७४) अस्त्रहीनं समं कृत्वा अष्टांगुलमयोमयम् :
पिण्डं तु तापयेदग्नौ पंचाशत्पलिकं समम् :: मिता.अप.२.१०५

७५) तत्र पूजां हुताशस्य कारयेन्मनुजाधिपः :
रक्तचन्दनधूपाभ्यां रक्तपुष्पैस्तथैव च :: स्मृच.२६३,०यप्र.१९६-७

७६) पश्चिमे मण्डले तिष्ठेत्प्राङ्मुखः प्रांजलिः शुचिः :
लक्षयेयुः क्षतादीनि हस्तयोस्तस्य कारिणः :: अप.२.१०३

७७) करौ प्रमृदितव्रीही तस्यादावेव लक्षयेत् :: " "

७८) सप्त पिप्पलपत्राणि अक्षतान्सुमनो दधि :
हस्तयोर्निक्षिपेत्तत्र सूत्रेणावेष्टनं तथा :: " "

७९) पिप्पलाज्जायते वह्निः पिप्पलो वृक्षराट् स्मृतः :
अतस्तस्य तु पत्राणि हस्तयोर्विन्यसेद् बुधः :: मिता.२.१०३,स्मृच.२६५

८०) तापिते तु ततः पश्चादग्निमावाहयेच्छुचिः :
आवाहनं तु देवानां पूर्वं कृत्वा विधानवत् :: अप.२.१०५

८१) त्वमग्ने वेदाश्चत्वारस्त्वं च यज्ञेषु हूयसे :
त्वं मुखं सर्वदेवानां त्वं मुखं ब्रह्मवादिनाम् :: मिता.२.१०४

८२) जठरस्थो हि भूतानां ततो वेत्सि शुभाशुभम् :
पापं पुनासि वै यस्मात्तस्मात्पावक उच्यसे :: " "

८३) पापेषु दर्शयात्मानमर्चिष्मान् भव पावक :
अथवा शुद्धभावेषु शीतो भव हुताशन :: " "

८४) त्वमग्ने सर्वभूतानामन्तश्चरसि पावक :
साक्षिवत्पुण्यपापेभ्यो ब्रूहि सत्यं कवे मम :: " "

८५) ०यवहाराभिशस्तोऽयं मानुषः शुद्धिमिच्छति :
तदेनं संशयादस्माद्धर्मतस्त्रातुमर्हसि :: " "

८६) ततस्तं समुपादाय राजा धर्मपरायण: :
संदंशेन नियुक्तो वा हस्तयोस्तस्य निक्षिपेत् :: स्मृच.२६८,०यप्र.२००
८७) त्वरमाणो न गच्छेत स्वस्थो गच्छेच्छनै: शनै: :
न मण्डलमतिक्रामेन्नाप्यर्वाक् स्थापयेत् पदम् ::
८८) अष्टमं मण्डलं गत्वा नवमे निक्षिपेद् बुध: :: अप.२.१०६
८९) भयार्त: पातयेद्यस्तु व्रणं च न विभाव्यते :
पुनरारोपयेल्लोहं स्थितिरेषा दृढीकृता :: ०यक.232
९०) ततस्तद्धस्तयो: प्रास्येद् व्रीहीन्वा यदि वा यवान् :
निर्विशंकेन तेषां तु हस्ताभ्यां मर्दने कृते ::
निर्विकारे दिनस्यान्ते शुद्धिं तस्य विनिर्दिशेत् :: अप.२.१०७
९१) तोयस्यात: प्रवक्ष्यामि विधिं धर्म्यं सनातनम् :
शुभाशुभपरीक्षार्थं ब्रह्मणाभिहितं स्वयम् ::
मण्डलं धूपदीपाभ्यां कारयेच्च विचक्षण: :: अप.२.१०९
९२) शरान् संपूजयेद् भक्त्या वैणवं च धनुस्तथा :
मंगलैर्धूपदीपैश्च तत: कर्म समाचरेत् :: " "
९३) क्षेप्ता च क्षत्रिय: कार्यस्तद्वृत्तिर्ब्राह्मणोऽपि वा :
अक्रूरहृदय: शान्त: सोपवासस्तथा शुचि: :: " "
९४) मध्यमेन च चापेन प्रक्षिपेच्च शरत्रयम् :
हस्तानां तु शते सार्धे लक्ष्यं कृत्वा विचक्षण: :: " "
९५) तेषां च प्रेषितानां च शराणां शास्त्रचोदनात् :
मध्यमस्तु शरो ग्राह्य: पुरुषेण बलीयसा :: " "
९६) शरस्य पतनं ग्राह्यं सर्पणं तु विवर्जयेत् :
सर्पन् सर्पन् शरो यायात् दूराद्दूरतरं यत: :: अप.२.१०९
९७) इषून्न प्रक्षिपेद् विद्वान् मारुते वाति वै भृशम् :
विषमे भूप्रदेशे च वृक्षस्थाणुसमाकुले :: " "
तृणगुल्मलतावल्लीपंकपाषाणसंयुते :: मिता.२.१०९
९८) स्थिरे तोये निमज्जेत्तु न ग्राहिणि न चाल्पके :
तृणशैवालरहिते जलूकामत्स्यवर्जिते :: अप.२.१०९

| | | |
|---|---|---|
| ९९) | देवखातेषु यत्तोयं तस्मिन्कुर्याद्विशोधनम् | : |
| | आहार्यं वर्जयेन्नित्यं शीघ्रगासु नदीषु च | :: अप २.१०८ |
| १००) | नदीषु नातिवेगासु तडागेषु सरःसु च | : |
| | ह्रदेषु स्थिरतोयेषु कुर्यात्पुंसां निमज्जनम् | :: अप.२.१०९ |
| १०१) | आविशेत्सलिले नित्यमूर्मिपंकविवर्जिते | :: मिता.२.१०८ |
| १०२) | स्थापयेत्प्रथमं तोये स्तम्भवत्पुरुषं नृपः | : |
| | आश्रित्य यं निमज्जन्ति मानवाः शुद्धिकांक्षिणः | :: अप.२.१०८ |
| १०३) | आगतं प्राङ्मुखं कृत्वा तोयमध्ये तु कारिणम् | : |
| | ततस्त्वावाहयेद्देवान् सलिलं चानुमन्त्रयेत् | :: व्यप्र.२०५ |
| १०४) | तोय त्वं प्राणिनां प्राणः सृष्टेराद्यं तु निर्मितम् | : |
| | शुद्धेश्च कारणं प्रोक्तं द्रव्याणां देहिनां तथा | :: मिता.२.१०९ |
| | अतस्त्वं दर्शयात्मानं शुभाशुभपरीक्षणे | :: मिता.२.१०८ |
| १०५) | गन्तुश्चापि च कर्तुश्च समं गमनमज्जनम् | : |
| | गच्छेत्तोरणमूलात्तु लक्ष्यस्थानं जवी नरः | :: " " |
| १०६) | शरप्रक्षेपणात्स्थानाद्युवा जवसमन्वितः | : |
| | गच्छेत्परमया शक्त्या यत्रासौ मध्यमः शरः | :: व्यक. |
| १०७) | तस्मिन् गते द्वितीयोऽपि वेगादादाय सायकम् | : |
| | गच्छेत्तोरणमूलं तु यतः स पुरुषो गतः | :: मिता.२.१०९ |
| १०८) | मध्यमं शरमादाय पुरुषोऽन्यस्तथाविधः | : |
| | प्रत्यागच्छेत्तु वेगेन यतः स पुरुषो गतः | :: व्य.क. |
| १०९) | आगतस्तु शरग्राही न पश्यति यदा जले | : |
| | अन्तर्जलगतं सम्यक् तदा शुद्धिं विनिर्दिशेत् | :: मिता.२.१०९ |
| ११०) | अन्यथा न विशुद्धः स्यादेकांगस्यापि दर्शनात् | : |
| | स्थानाद्वान्यत्र गमनाद्यस्मिन्पूर्वं निवेशितः | :: " " |
| १११) | विषस्यापि प्रवक्ष्यामि विधिं लक्षणचोदितम् | : |
| | अभियुक्ताय दातव्यं तावन्मात्रं प्रदीयते | :: धर्मकोश ५१० |
| ११२) | यवाः सप्त प्रदातव्याः शुद्धिहेतोरसंशयम् | : |
| | शृंगिणो वत्सनाभस्य हिमजस्य विषस्य वा | :: मिता.२.१११, अप.२.१११ |
| ११३) | चारितानि च जीर्णानि कृत्रिमाणि तथैव च | : |
| | भूमिजानि च सर्वाणि विषाणि परिवर्जयेत् | :: मिता-अप-२.१११ |

११४) दीयमानं करे कृत्वा विषं तु परिशापयेत् :: अप.२.१११

११५) त्वं विष ब्रह्मणा सृष्टं परीक्षार्थं दुरात्मनाम् :
पापेषु दर्शयात्मानं शुद्धानाममृतं भव :: अप.२.१११

११६) मृत्युमूर्ते विष त्वं हि ब्रह्मणा परिनिर्मितम् :
त्रायस्वैनं नरं पापात् सत्येनास्यामृतं भव :: मिता.२.१११

११७) त्रिरात्रं पंचरात्रं वा पुरुषैः स्वैरधिष्ठितम् :
कुहकादिभयात्राररा धारयेद्दि०यकारिणम् :: " "

११८) औषधीर्मन्त्रयोगांश्च मणीनथ विषापहान् :
कर्तुः शरीरसंस्थांस्तु गूढोत्पन्नान् परीक्षयेत् :: " "

११९) भक्षिते तु यदा स्वस्थो मूर्च्छाछर्दिविवर्जितः :
निर्विकारो दिनस्यान्ते शुद्धं तमिति निर्दिशेत् :: " "

१२०) कोशस्याथ प्रवक्ष्यामि विधिं धर्मं सनातनम् :
कारणेषु च दात०यो येषु येषु च तान् श्रृणु :: धर्मकोश ५१६

१२१) भक्तो यो यस्य देवस्य पाययेत्तस्य तज्जलम् :
समभावे तु देवानामादित्यस्य तु पाययेत् :: मिता.२.११२

१२२) दुर्गायाः पाययेच्चौरान् ये च शस्त्रोपजीविनः :
भास्करस्य तु यत्तोयं ब्राह्मणं तन्न पाययेत् :: " "

१२३) दुर्गायाः स्नापयेच्छूलमादित्यस्य तु मण्डलम् :
अन्येषामपि देवानां स्नापयेदायुधानि तु :: " "

१२४) विश्रम्भे सर्वशंकासु सन्धिकार्ये तथैव च :
शेषु कोशः प्रदात०यो नित्यं चित्तविशुद्धये :: " "

१२५) पूर्वाह्णे सोपवासस्य स्नातस्यार्द्रपटस्य च :
सशूकस्या०यसनिनः कोशपानं विधीयते :: " "

१२६) प्राङ्मुखं कारिणं कृत्वा पाययेत् प्रसृतित्रयम् :
पूर्वोक्तेन विधानेन स्नातमार्द्राम्बरं शुचिम् :: ०य.प्र.२१३

१२७) त्रिरात्रात्सप्तरात्राद्वा दशाहाद्वा द्विसप्तकात् :
वैकृतं यस्य दृश्येत पापकृत्स तु मानवः :: मिता.२.११३

१२८) तस्यैकस्य न सर्वस्य जनस्य यदि तद्भवेत् :
रोगोऽग्निर्ज्ञातिमरणं चैव तस्य विभावना :: अप.२.११३

१२९) तण्डुलानां प्रवक्ष्यामि विधिं भक्षणचोदितम् :
चौर्ये तु तण्डुला देया नान्यत्रेति विनिश्चयः :: अप.२.११३

१३०) तण्डुलान्कारयेच्छुक्लान् शालेर्नान्यस्य कस्यचित् :
मृण्मये भाजने कृत्वा आदित्यस्याग्रतः शुचिः :: " "

१३१) स्नानोदकेन संमिश्रान् रात्रौ तत्रैव वासयेत् :
आवाहनादिपूर्वं तु कृत्वा रात्रौ विधानतः :: " "

१३२) प्रभाते कारिणो देया आदित्याभिमुखस्य तु :
प्राङ्मुखोपोषितं स्नातं शिरोरोपितपत्रकम् :: " "

१३३) तण्डुलान् भक्षयित्वा तु पत्रे निष्ठीवयेत्ततः :
पिप्पलस्य न नान्यस्य अभावे भूर्ज एव तु :: " "

१३४) सरक्तास्तण्डुला यस्य यत्र न स्युः सुचर्विताः :
विकृतं ष्ठीवनं यस्य तमशुद्धं विनिर्दिशेत् :: " "

१३५) तप्तमाषस्य वक्ष्यामि विधिमुद्धरणे शुभम् :
कारयेदायसं पात्रं ताम्रं वा षोडशांगुलम् :: मिता २.११३

१३६) चतुरंगुलखातं तु मृण्मयं वाथ मण्डलम् :
पूरयेद् घृततैलाभ्यां विंशत्या वै पलैस्तु तत् :: " "

१३७) सुवर्णमाषकं तस्मिन् सुतप्ते निक्षिपेत्ततः :
अंगुष्ठांगुलियोगेन तप्तमाषकमुद्धरेत् :: अप.२.११३

१३८) कराग्रं यो न धुनुयाद्विस्फोटो वा न जायते :
शुद्धो भवति धर्मेण निर्विकारकरांगुलिः :: " "

१३९) भ्रमद्वीचितरंगाढ्ये अनखस्पर्शगोचरे :
परीक्षेतार्द्रपर्णेन चुरुकारं सघोषकम् :: मिता.२.११३

१४०) ततश्चानेन मन्त्रेण सकृत्तदभिमन्त्रयेत् :
परं पवित्रममृतं घृत त्वं यज्ञकर्मसु ::
दह पावक पापं त्वं हिमशीतं शुचौ भव :: " "

१४१) उपोषितं ततः स्नातमार्द्रवाससमागतम् :
ग्राहयेन्मुद्रिकां तां तु घृतमध्यगतां तथा :: " "

१४२) प्रदेशिनीं च तस्याथ परीक्षेयुः परीक्षकाः :
यस्य विस्फोटका न स्युः शुद्धोऽसावन्यथाऽशुचिः :: " "

१४३) अथवा मृण्मयं पात्रं तत्प्रमाणं तु कारयेत् :
चतुरंगुलमुच्छ्रीयं कर्त०यं परिमण्डलम् :: स्मृतिचिन्तामणि (धर्मकोश पृ.५२२)
१४४) कटाहमात्रं तत्पात्रं कल्पनीयं तु युक्तित: :
अंगुष्ठांगुलियोगेन सत्यमामन्त्र्य वीतभी: :: " "
१४५) अुत्तार्य भूमौ तत्काले क्षिपेत्स्वर्णस्य माषकम् :
अभावे तु कटाहस्य क्षिपेत् पात्रान्तरे तु तत् :: " "
१४६) त्रिपुटी .... दद्यात् त्रिवारं करमध्यके :: " "
१४७) न वै संतप्तमात्रं तु कर्त०यं तु सभासदै: :
मधुपिंगलवर्णं तु दृष्टिसंचारयोग्यकम् :: " "
१४८) रक्तिकाष्ठामितं कुर्यात् माषवद्घटना स्मृता :
यदा फेनोद्गमस्तैले तदा पाको विधीयते :: " "
१४९) सर्पिषश्च तदा पाक: फेनशान्तिर्यदा भवेत् :
न चातिगाढं स्नेहं तन्न चक्षुर्विषयं तु यत् :: " "
१५०) मुखान्न चलति या धारा पिण्डीभूतं च यद्भवेत् :
ता अेवौष्ठकण्ठश्लेषश्च तमशुद्धं विनिर्दिशेत् :: " "
१५१) आयसं लेलिहानस्य जिह्वयापि समादिशेत् :: अप.२.१०५
१५२) अधुना संप्रवक्ष्यामि धर्माधर्मपरीक्षणम् :
हन्तॄणां याचमानानां प्रायश्चित्तार्थिनां नृणाम् ::
राजतं कारयेद्धर्ममधर्मं सीसकायसम् :: मिता.२.११३
१५३) लिखेद् भूर्जे पटे वाऽपि धर्माधर्मौ सितासितौ :
अभ्युक्ष्य पंचग०येन गंधमाल्यै: समर्चयेत् :: " "
१५४) सितपुष्पस्तु धर्म: स्यादधर्मोऽसितपुष्पधृक् :
अेवं विधायोपलिप्य पिण्डयोस्तौ निधापयेत् :: " "
१५५) गोमयेन मृदा वापि पिण्डौ कार्यौ समन्तत: :
मृद्भाण्डकेऽनुपहते स्थाप्यौ चानुपलक्षितौ :: " "
१५६) अुपलिप्ते शुचौ देशे देवब्राह्मणसन्निधौ :
आवाहयेत्ततो देवान् लोकपालांश्च पूर्ववत् :: " "
१५७) धर्मावाहनपूर्वं तु प्रतिज्ञापत्रकं लिखेत् :
यदि पापविमुक्तोऽहं धर्मस्त्वायातु मे करे ::
अशुद्धश्चेन्मम करे पापमायातु धर्मत: :: " "

१५८) अभियुक्तस्ततश्चैकं प्रगृह्णीतावलम्बितः :
धर्मे गृहीते शुद्धः स्याददधर्मे स तु हीयते ::
अेवं समासतः प्रोक्तं धर्माधर्मपरीक्षणम् :: मिता.२.१११

---

(१०) Prajāpati

१) लिखितादिक्रिया नस्याच्छपथं दि०यमेव वा :
सर्वेषु च विवादेषु योजयेद्दि०यमेव वा :: धर्मकोश.२२२

२) कुजवारे वाऽर्कवारे वा चण्डिकारुद्रसन्निधौ :
पूर्वाह्णे सर्वदि०यानां प्रदानमनुकीर्तितम् :: धर्मकोश.४६९

---

(११) Yama

१) कृत्वा मृषा तु शपथं कीटस्य वधसंयुतम् :
अनृतेन च युज्येत वधेन च तथा नरः ::
तस्मान्नमिथ्या शपथं नरः कुर्याद्यथेप्सितम् :: ०य.प्र.२२१

---

(१२) Vyāsa

१) प्रमाणैर्हेतुचरितैः शपथेन नृपाज्ञया :
वादिसंप्रतिपत्त्या वा निर्णयोऽष्टविधः स्मृतः :: ०यक.२५८

२) लिखितं साक्षिणो भुक्तिः प्रमाणं त्रिविधं स्मृतम् :
अनुमानं विदुर्हेतुस्तर्कश्चेति मनीषिणः :: ०यक.१५८

३) देशस्थितिः पूर्वकृता चरित्रं समुदाहृतम् :
अर्थानुरूपाः शपथाः स्मृताः सत्यघटादयः ::
तेषामभावे राजाज्ञा निर्णयं तु विदुर्बुधाः :: ०यक.२५८

४) अधोगतिर्न शुद्ध्येत्तु शुद्ध्येदूर्ध्वगतिस्तथा :
समोऽपि न हि शुद्धः स्यादेषा शुद्धिरुदाहृता :: ०यक.२२३

५) शिक्यादिच्छेदभंगे च पुनरारोपयेन्नरम् :
अेवं निःसंशयज्ञानात्ततो भवति निर्णयः :: धर्मकोश ४८५

---

(१३) Hārīta

१) निष्के तु सत्यवचनं द्विनिष्के पादलम्भनम् :
अूनत्रिके तु पुष्पं (v.l. पुष्पं) स्यात् कोशपानमतः परम् :: ०यप्र.१७५
२) धने प्रमुषिते चौरैः प्रहृतेऽपि धनी स्वयम् :
परिमाणं स्वरूपं च शपथेनापि शोधयेत् :: सवि.१८३
३) कोशतण्डुलधर्मास्तु धर्मसंभवमेव च :
पुत्रदारादिशपथान् सर्ववर्णे प्रयोजयेत् :: ०य.प्र.१८०
४) प्राङ्मुखस्तु ततस्तिष्ठेत् प्रसारितकरांगुलिः :
आर्द्रवासाः शुचिश्चैव शिरस्यारोप्य पत्रकम् :: अप.२.१०३
५) गोमयेनानुलिप्तायां भूमौ शोध्यं तु पाययेत् :: सवि.२०९

---

(१४) Vṛddhahārīta

१) मिथ्यापवादशुद्ध्यर्थं पंचदि०यानि कल्पयेत् :
ज्ञात्वा शुद्धेषु दि०येषु शुद्धान्वै मानयेत्तथा ::
तन्मिथ्याशंसिनं दुष्टं जिह्वाच्छेदेन दण्डयेत् :: वृद्धहा.७.१९८ -१९९

---

(१५) Māṇḍavya

१) शपथो द्विविधः प्रोक्तः शीत अुष्मस्तथापरः :
सार्धत्रिचन्द्रदिवसैः शीत अुष्मस्तत्कालिकः स्मृतः :: धर्मकोश.४४२
२) शीते पुत्रकलत्रादिमरणे तु पराजयः :
तीक्ष्णैर्विस्फोटदंशादि वक्त०यं मंगलक्षणम् :: " "

---

(१६) Atri

१) फालदानस्य काले तु संदेहेन स्पृशेयदि :
करावधूननात्तैले यदि तैलकण: पतेत् ::
२) लोहदगृधश्च संयोगाधदि स्वांगं विमुच्यति :
न तेन दाहो भंगाय अत्रिणा समुदीरित: ::
३) त्रिपुटी तप्तमाषे तु काले तु करमध्यकम् :
विलोक्य भंगं तु वदेदित्याह भगवान् यम: :: धर्मकोश ४६९

---

(१७) Anirdistakartrkavacana

१) अशेषमानुषाभावे दि०येनैव विनिर्णय: :
संभवे साक्षिणां प्राज्ञो दैविकीं तु विवर्जयेत् :: धर्मकोश २३६
२) शपथो द्विविध: प्रोक्तो दैवो दि०यस्तथैव च :
सद्य: प्रत्ययकृद्दि०यं दैवस्तूह्याच्चतुर्दश :: धर्मकोश ४४२
३) उभयोरपि संयोगे दि०यं देयं विशुद्धये ::
४) नष्टं पत्रं मृत: साक्षी देशकालविपर्यय: :
समाजनविचारेण धनिनो दि०यमर्हति ::
५) न दि०यं प्रतिदि०येषु न दि०यं साक्षिभाषणे :
न दि०यं चाल्पद्र०येषु न दि०यं ब्राह्मणे नृपे ::
६) न रुग्णे नैव बालेऽपि न चापि विकलेन्द्रिये :
कुकर्मणि रते नैव ह्यपुत्रे निर्धने तथा ::
७) अभिशस्तं तथा स्तेनं शपथे नैव योजयेत् :
आहर्तापहार्यौ द्वौ विवदन्तौ स्थितौ यदा ::
अपहार्यो धनी ज्ञेय: स स्वकं धनमुद्धरेत् ::
८) मूलग्रामात्समुत्पन्नं लघुग्रामान्तरं तु यत् :
तस्य दि०यं न देयं स्याद्धनिनो दि०यमर्हति ::

(३–८: धर्मकोश पृ. ४६९ – ४७०)

९) यद्यधो यात्यशुद्ध: स्यात्तुलाभंगे च सर्वदा :
न विशीर्यति शिक्यं चेदूर्ध्वं याति विशुद्ध्यति :: धर्मकोश पृ.४८४
१०) ०यसने तु समुत्पन्ने राजदैविकतस्करै: :
गृहक्षेत्रादिदाहे वाऽशुद्धिं तस्य विनिर्दिशेत् :: धर्मकोश पृ.५१८

---

(१८) Kālikāpurāṇa

१) परदाराभिशापे च चौर्यागम्यागमेषु च :
महापातकशस्ते च स्याद्दिव्यं नृप साहसे :: ०यप्र.१७२

२) विप्रतिपत्तौ विवादे ऽवर्णस्य ख्यापने कृते :
तत्रैव दापयेद्दिव्यं शिरःपूर्वं महीपतिः :: " "

३) परदाराभिमर्शे च बहवो यत्र वादिनः :
शिरोहीनं भवेद्दिव्यमात्मनः शुद्धिकारणात् :: " "

४) वैश्यस्य हि जलं देयं विषं शूद्रस्य दापयेत् :
वर्णान्त्यस्य सदा देयं माषकं तप्तहेमजम् :: ०य.क.२०५

५) उपोषितं तथा स्नातं मृत्समं प्रथमं तुलाम् :
संतोल्य कारयेद्रेखामवतार्यानुमन्त्रयेत् :: दि.त. ५८९

६) शतार्धपालिकं वृत्तं द्वादशांगुलमायतम् :
लोहमग्निमयं ध्मातं देयं राज्ञाभिशापिने :: ० ०य.प्र.१९६

७) मण्डलानि तथा सप्त षोडशांगुलमानतः :
तावदन्तरतो गच्छेद्गत्वा नवतृणे क्षिपेत् :: दि.त.५९७ ,०य.प्र.२०१

८) ब्राह्येनं वरुण त्वं हि अस्मादेवाभिशापतः :
शुद्धश्चेदतिकारुण्यादभिमन्त्र्य जले क्षिपेत् :: ०य.प्र.२०६

९) नाभिमात्रोदकस्थस्य पुरुषस्योपगृह्य वै :
प्रणम्य देवतामिष्टां तस्मिन् मग्नो जले भवेत् :: ०य.क.२३८

१०) न धुनेदः कराग्रं तु यस्य रक्तं न जायते :
विस्फोटाद्यैस्तथा दोषैः स शुद्धो यस्य चोज्झितम् :: ०य.प्र.२१७

---

(१९) Padmapurāṇa

१) स्थावरं जंगमं वापि ... यद्द्रव्यमभियुज्यते :
क्रियाप्रयोगकाले तु तन्मूल्यं धर्मतोऽर्हति ::
तेनैव कनकीकृत्य तत्र दिव्यं प्रयोजयेत् :: धर्मकोश ४७०

(२०) Samkirnadivyavidhih

१) सीमाविवादे संप्राप्ते भारता .... : धर्मकोश पृ.५२५
सीमां समुद्धरेत्तत्र .. स्पृशेच्च :
हरिवंशाद्वंशनाशो गंगया च कुलक्षय: :
शालिग्रामशिला दुर्गा न स्पृश्या च कदाचन :
पुराणानां च सर्वस्वं भारतं परिकीर्तितम् :
भारतस्यापि सर्वस्वं हरिवंश इति स्मृत: ::
तस्मात्सीमाविवादे त्वं सत्यपक्षे स्थिरो भव ::
ज्येष्ठपुत्रं कलत्रं च ज्येष्ठा....णांस्तथा :
आत्मानं लेखयेत्पत्रे तद्धानौ हानिरुच्यते ::
हरिवंशस्य दुर्गायास्तण्डुलानां कनकस्य च :
दातुर्ग्रहीतुर्हस्ताच्च पतनं यदि जायते ::
स्वयं वा प्रस्खलेद्भूमौ वाससां स्खलनं भवेत् :
अन्धत्वं दिग्भ्रमश्चापि सर्वो भंगस्य ...... ::
हरिवंश: सीमवादे भेदे दुर्गा तु कथ्यते :
मैत्रीभेदे शिला प्रोक्ता मन:शुद्धिरतोऽन्यथा :: ( ~~काव्यक~~ .)

धर्मकोश पृ.५२५

---

(२१) S'ukraniti

१) सप्तर्षिभिश्च भीत्यर्थं स्वीकृतान्यात्मशुद्धये :: ४.७२६ धर्मकोश पृ.४७०
२) स्वमहत्वाच्च यो दि०यं न कुर्यात् ज्ञानदर्पत: :
वसिष्ठाद्याश्रितं नित्यं स नरो धर्मतस्कर: :: ४.७२७ " "
३) प्राप्ते दि०येऽपि न शपेद् ब्राह्मणो ज्ञानदुर्बल: :
संहरन्ति च धर्मार्धं तस्य देवा न संशय: :: ४.७२८ " "
४) यस्तु स्वशुद्धिधर्मान्विच्छन् दि०यं कुर्यादतन्द्रित: :
विशुद्धो लभते कीर्तिं स्वर्गं चैवान्यथा न हि :: ४.७२९ " "
५) अग्निर्विषं घटस्तोयं धर्माधर्मौ च तण्डुला: :
शपथाश्चैव निर्दिष्टा मुनिभिर्दि०यनिर्णये :: ४.७३० " "

| | | | |
|---|---|---|---|
| ६) पूर्व पूर्व गुरुतरं कार्यं दृष्ट्वा नियोजयेत् | : | | |
| लोकप्रत्ययत: प्रोक्तं सर्वं दि०यं गुरू स्मृतम् | :: ४.७३१ | धर्मकोश | पृ.४७० |
| ७) तप्तायोगोलकं धृत्वा गच्छेन्नवपदं करे | : | | |
| तप्तांगारेषु वा गच्छेत्पद्भ्यां सप्तपदानि हि | : ४.७३२ | " | " |
| ८) तप्ततैलगतं लोहमाषं हस्तेन निर्हरेत् | : | | |
| सुतप्तलोहपत्रं वा जिह्वया संलिहेदपि | :: ४.७३३ | " | " |
| ९) गरं प्रभक्षयेद्धस्तै: कृष्णसर्पं समुद्धरेत् | : | | |
| कृत्वा स्वस्य तुलासाम्यं हीनाधिक्यं विशोधयेत् | :: ४.७३४ | " | " |
| १०) स्वेष्टदेवस्नपनजमथादुदकमुत्तमम् | : | | |
| यावन्नियमित: कालस्तावदम्बुनिमज्जनम् | :: ४.७३५ | " | " |
| ११) अधर्मधर्ममूर्तीनामदृष्टहरणं तथा | : | | |
| कर्षमात्रांस्तण्डुलांश्च चर्वयेच्च विशंकित: | :: ४.७३६ | " | " |
| १२) स्पर्शयेत्पूज्यपादांश्च पुत्रादीनां शिरांसि च | : | | |
| धनानि संस्पृशेद् द्राक् तु सत्येनापि शपेत्तथा | :: ४.७३७ | " | " |
| १३) दुष्कृतं प्राप्नुयात्सद्यो नश्येत्सर्वं तु सत्कृतम् | : | | |
| सहस्रेऽपहृते चाग्नि: पादोने च विषं स्मृतम् | :: ४.७३८ | " | ४७१ |
| १४) त्रिभागोने घट: प्रोक्तो ह्यर्धे च सलिलं तथा | : | | |
| धर्माधर्मौ तदर्धे च ह्यष्टमांशे च तण्डुला: | :: ४.७३९ | " | " |
| १५) षोडशांशे च शपथा अेवं दि०यविधि: स्मृत: | :: ४.७४० | " | " |

---

(२२) Kaumārikākhaṇḍa – Adhyaya 44.

अर्जुन अुवाच :

दि०यप्रकारमिच्छामि श्रोतुं चाहं मुनीश्वर :
कथं कार्याणि कानीह स्फुटं यै: पुण्यपापकम् :: १

नारद अुवाच :

शपथा: कोशघटकौ विषाग्नी तप्तमाषकौ :
फलं च तंदुलं चैव दि०यान्यष्टौ विदुर्बुधा: :: २

असाक्षिककेषु चार्थेषु मिथो विवदमानयोः :
राजद्रोहाभिशापेषु साहसेषु तथैव च :: ३
अविदंस्तत्वतः सत्यं शपथेनाभिलंघयेत्
महर्षिभिश्च देवैश्च सत्यार्थाः शपथाः कृताः :: ४
जवनो नृपतिः क्षीणो मिथ्याशपथमाचरेत् :
वसिष्ठाग्रे वर्षमध्ये सान्वयः किल भारत :: ५
अन्धः शत्रुगृहं गच्छेद्यो मिथ्याशपथांश्चरेत् :
रौरवस्य स्वयं द्वारँमुद्घाटयति दुर्मतिः :: ६
मन्यन्ते वै पापकृतो न कश्चित्पश्यतीति नः :
तांश्च देवाः प्रपश्यन्ति स्वस्यैवान्तरपौरुषाः :: ७
आदित्यचन्द्रावनिलोऽनलश्च
द्यौर्भूमिरापो हृदयं यमश्च :
अहश्च रात्रिश्च उभे च सन्ध्ये
धर्मो हि जानाति नरस्य वृत्तम् :: ८
एवं तस्मादभिज्ञाय सत्यार्थं शपथांश्चरेत् :
वृथा हि शपथान्कुर्वन्प्रेत्य चेह विनश्यति :: ९
इदं सत्यं वदामीति ब्रुवन्साक्षी भवान्यतः :
शुभाशुभफलं देहि शुचिः पादौ रवेः स्पृशेत् :: १०
अथ शास्त्रस्य विप्रोऽपि शस्त्रस्यापि च क्षत्रियः :
गां संस्पृशंस्तथा वैश्यः शूद्रः स्वगुरुमेव च :: ११
मातरं पितरं पूज्यं स्पृशेत्साधारणं त्विदम् :
कोशस्य रूपं पूर्वं ते व्याख्यातं पाण्डुनन्दन :: १२
विप्रवर्ज्यं तथा कोशं वर्णिनां दापयेन्नृपः :
यो यो यद्देवताभक्तः पाययेत्तस्य तं नरम् :: १३
समभक्तं च देवानामादित्यस्यैव पाययेत् :
सर्वेषां चोग्रदेवानां स्नापयेदायुधाग्रकम् :: १४
स्नानोदकं वा संकल्प्य गृहीत्वा पाययेद्ध्रुवम् :
त्रिसप्तरात्रमध्ये च फलं कोशस्य निर्दिशेत् :: १५
अतः परं महादिव्यविधानं शृणु यद्भवेत् :
संशयच्छेदि सर्वेषां धार्ष्ट्यात् तद्दिव्यमेव च :: १६

सशिरस्कं प्रदात०यमिति ब्रह्मा पुराब्रवीत् :
महोग्राणां च दात०यमशिरस्कमपि स्फुटम् :: १७
साधूनां वर्णिनां राजा न शिरस्कं प्रदापयेत् :
न प्रवाते घटं देयं नोष्णकाले हुताशनम् :: १८
वर्णिनां च तथा कालं तन्दुलं मुखरोगिणाम् :: १९
कुष्ठपित्तार्दितानां च ब्राह्मणानां च नो विषम् :
तप्तमाषकमर्हन्ति सर्वे धर्म्यं निरत्ययम् :: २०
न ०याधिमरके देशे शपथान्कोशमेव च :
दि०यान्यासुरकैर्मन्त्रै: स्तम्भयन्तीह केचन :: २१
प्रतिघातविदस्तेषां योजयेद्धर्मवत्सलान् :
दि०यानां स्तम्भकान् ज्ञात्वा पापाभ्रित्यं महीपति: :: २२
विवासयेत्स्वकाद्राष्ट्रात्ते हि लोकस्य कण्टका: :
तेषामन्वेषणे यत्नं राजा नित्यं समाचरेत् :: २३
ते हि पापसमाचारास्तस्करेभ्योऽपि तस्करा: :
प्रागुदृष्टदोषान्स्वल्पेषु दि०येषु विनियोजयेत् :: २४
महत्स्वपि न चार्थेषु धर्मज्ञान्धर्मवत्सलान् :
न मिथ्यावचनं येषां जन्मप्रभृति विद्यते :: २५
श्रद्दध्यात्पार्थिवस्तेषां वचनादेव भारत :
ज्ञात्वा धर्मिष्ठतां राजा पुरुषस्य विलक्षण: :: २६
क्रोधाल्लोभात्कारयंश्च स्वयमेव प्रदुष्यति :
तस्मात्पापिषु दि०यं स्यात्तत्रादौ प्रोच्यते घटे :: २७
सुसमायां पृथि०यां च दिग्भागे पूर्वदक्षिणे :
यज्ञियस्य तु वृक्षस्य स्थाप्यं स्यान्मुण्डकद्वयम् :: २८
स्तम्भकस्य प्रमाणं च सप्रहस्तं प्रकीर्तितम् :
द्वौ हस्तौ निखनेत् काष्ठं दृश्यं स्यात् हस्तपंचकम् :: २९
अन्तरं तु तयो: कार्यं तथा हस्तचतुष्टयम् :
मुण्डकोपरि काष्ठं च दृढं कुर्याद्विचक्षण: :: ३०
चतुर्हस्तं तुलाकाष्ठमव्रणं कारयेत्स्थिरम् :
खदिरार्जुनवृक्षाणां शिंशपाशालजं त्वथ :: ३१

तुलाकाष्ठे तु कर्तव्यं तथा वै शिक्यकद्वयम् :
प्राङ्मुखो निश्चल: कार्य: शुचौ देशे घटस्तथा :: ३२
पाषाणस्यापि जायेत स्तम्भेषु च घटस्तथा :
वणिक्सुवर्णकारो वा कुशल: कांस्यकारक: :: ३३
तुलाधारधर: कार्यो रिपौ मित्रे च य: सम: :
श्रावयेत्प्राड्विवाको ऽपि तुलाधारं विचक्षण: :: ३४
ब्रह्मघ्ने ये स्मृता लोका ये च स्त्रीबालघातके :
तुलाधारस्य ते लोकास्तुलां धारयतो मृषा :: ३५
अेकस्मिंस्तोलयेच्छिक्ये ज्ञातं सूपोषितं नरम् :
द्वितीये मृत्तिकां शुभ्रां गौरां तु तुलयेद् बुध: :: ३६
इष्टिकाभस्मपाषाणकपालास्थीनि वर्जयेत् :
तोलयित्वा तत: पूर्वं तस्मात्तमवतारयेत् :: ३७
मूर्ध्नि पत्रं ततो न्यस्य न्यस्तपत्रं निवेशयेत् :
पत्रे मन्त्रस्त्वयं लेख्यो य: पुरोक्त: स्वयंभुवा :: ३८
ब्रह्मणस्त्वं सुता देवि तुलानाम्नेति कथ्यते :
तुकारो गौरवे नित्यं लकारो लघुनि स्मृत: :: ३९
गुरुलाघवसंयोगात्तुला तेन निगद्यसे :
संशयान्मोचयस्त्वैनमभिशस्तं नरं शुभे :: ४०
भूय आरोपयेत्तं तु नरं तस्मिन्सपत्रकम् :
तुलितो यदि वर्धेत शुद्धो भवति धर्मत: :: ४१
हीयमानो न शुद्ध: स्यादिति धर्मविदो विदु: :
शिक्यच्छेदे तुलाभंगे पुनरारोपयेन्नरम् :: ४२
अेवं नि:संशयं ज्ञानं यच्चान्यायं न लोपयेत् :
अेतत्सर्वं रवौ वारे कार्यं संपूज्य भास्करम् :: ४३
अथात: सम्प्रवक्ष्यामि विषदिव्यं श्रुणुष्व मे :: ४४
द्विप्रकारं च तत्प्रोक्तं घटसर्पविषं तथा :: ~~४५~~
शृंगिणो वत्सनाभस्य हिमशैलभवस्य वा :: ४५
यवा: सप्त प्रदातव्या अथवा षड् घृतप्लुता: :
मूर्ध्नि विन्यस्तपत्रस्य पत्रे चैवं निवेशयेत् :: ४६

त्वं विष ब्रह्मण: पुत्र सत्यधर्मे व्यवस्थित: :
त्रायस्वैनं नरं पापात्सत्येनास्य भवामृतम् :: ४७
येन वेगैर्विना जीर्णं छर्दिमूर्च्छाविवर्जितम् :
तं तु शुद्धं विजानीयादिति धर्मविदो विदु: :: ४८
क्षुधितं क्षुधित: सर्पं घटस्थं मोच्य पूर्ववत् :
संस्पृशेत्तालिका: सप्त न दशेच्छुध्यतीति स: :: ४९
अग्निदिव्यं यथा प्राह विरिंचिस्तच्छृणुष्व मे :
सप्तमण्डलकान् कुर्याद्दिवस्याग्रे रवेस्तथा :: ५०
मण्डलान्मण्डलं कार्यं पूर्वेणेति विनिश्चय: :
षोडशांगुलकं कार्यं मण्डलात्तावदन्तरम् :: ५१
आर्द्रवाससमाहूय तथा चैवाप्युपोषितम् :
कारयेत्सर्वदिव्यानि देवब्राह्मणसन्निधौ :: ५२
प्रत्यक्षं कारयेद्दिव्यं राज्ञो वाधिकृतस्य वा :
ब्राह्मणानां श्रुतवतां प्रकृतीनां तथैव च :: ५३
पश्चिमे दिनकाले हि प्राङ्मुख: प्रांजलि: शुचि: :
चतुरस्रे मण्डलेऽन्ये कृत्वा चैव समौ करौ :: ५४
लक्षयेयु: कृतादीनि हस्तयोस्तस्य हारिण: :
सप्ताश्वत्थस्य पत्राणि बध्नीयु: करयोस्तत: :: ५५
नवेन कृतसूत्रेण कार्पासिन दृढं यथा :
ततस्तु सुसमं कृत्वा अष्टांगुलमथायसम् :: ५६
पिण्डं हुताशसंतप्तं पंचाशत्पलिकं दृढम् :
आदौ पूजां रवे: कृत्वा हुताशस्याथ कारयेत् :: ५७
रक्तचन्दनधूपाभ्यां रक्तपुष्पैस्तथैव च :
अभिशस्तस्य पत्रं च बध्नीयाच्चैव मूर्धनि :: ५८
मन्त्रेणानेन संयुक्तं ब्राह्मणाभिहितेन च :
त्वमग्ने वेदाश्चत्वारस्त्वं च यज्ञेषु हूयसे :: ५९
पापं पुनासि वै यस्मात्तस्मात्पावक उच्यसे :
त्वं मुखं सर्वदेवानां त्वं मुखं ब्रह्मवादिनाम् :: ६०

जठरस्थोऽसि भूतानां ततो वेत्सि शुभाशुभम् :
पापेषु दर्शयात्मानमर्चिष्मान्भव पावक :: ६१
अथवा शुद्धभावेषु शीतो भव महाबल :
ततोऽभिशस्तः शनैर्मण्डलानि परिक्रमेत् :: ६२
परिक्रम्य शनैर्जह्यात्लोहपिण्डं ततः क्षितौ :
विपद्रहस्तं तं पश्चात्कारयेद्व्रीहिमर्दनम् :: ६३
निर्विकारौ करौ दृष्ट्वा शुद्धो भवति धर्मतः :
भयाद् वा पातयेद्यस्तु तदधो वा विभाव्यते :: ६४
पुनस्त्वाहारयेल्लोहं विधिरेष प्रकीर्तितः :
अथातः संप्रवक्ष्यामि तप्तमाषविधिं श्रृणु :: ६५
कारयेदायसं पात्रं ताम्रं वा षोडशांगुलम् :
चतुरंगुलखातं तु मृण्मयं वापि कारयेत् :: ६६
पूरयेद् घृततैलाभ्यां पलैर्विंशतिभिस्ततः :
सुतप्ते निक्षिपेत्तत्र सुवर्णस्य तु माषकम् :: ६७
~~वह्न्युक्तं~~ वह्न्युक्तं विन्यसेन्मन्त्रमभिशस्तस्य मूर्धनि :
अंगुष्ठांगुलियोगेन तप्तमाषं समुद्धरेत् :: ६८
शुद्धं ज्ञेयमसंदिग्धं विस्फोटादिविवर्जितम् :
फालशुद्धिं प्रवक्ष्यामि तां श्रृणु त्वं धनंजय :: ६९
आयसं द्वादशपलं घटितं फालमुच्यते :
अष्टांगुलमदीर्घं च चतुरंगुलविस्तृतम् :: ७०
वह्न्युक्तं विन्यसेन्मन्त्रमभिशस्तस्य मूर्धनि :
त्रिः परावर्तयेज्जिह्वां लोहभस्मात्षडंगुलम् :: ७१
गवां क्षीरं प्रदातव्यं जिह्वाशोधनमुत्तमम् :
जिह्वापरीक्षणं कुर्याद्दग्धा चेन्न विमोच्यते :: ७२
तं विशुद्धं विजानीयाद् विशुद्धा चेत्तु जायते :
तन्दुलस्याथ वक्ष्यामि विधिधर्मं सनातनम् :: ७३
चौर्ये तु तन्दुला देया न चान्यत्र कथंचन :
तन्दुलानुदके सिक्त्वा रात्रौ तत्रैव स्थापयेत् :: ७४

प्रभाते कारिणे देया भक्षणाय न संशय: :
त्रि:कृत्व: प्राड्मुखश्चैव पत्रे निष्ठीपयेत्तत: :: ७५
पिप्पलस्याथ भूर्जस्य न त्वन्यस्य कथंचन :
तांस्तु वै कारयेच्छुद्धांस्तन्दुलान्छालिसंभवान् :: ७६
मृण्मये भाजने कृत्वा सवितु: पुरत: स्थित: :
तन्दुलान्मन्त्रयेच्छुद्धान्मन्त्रेणानेन धर्मत: :: ७७
दीयसे धर्मतत्वज्ञै मनुषाणां विशोधनम् :
स्तुतस्तन्दुल सत्येन धर्मतस्त्रातुमर्हसि :: ७८
निष्ठींवने कृते तेषां सवितु: पुरत: स्थिते :
शोणितं दृश्यते यस्य तमशुद्धं विनिर्दिशेत् :: ७९
अेवमष्टविधं दि०यं पापसंशयच्छेदनम् :
भट्टादित्यस्य मुखके पुरत: ज्ञायते कुरुनन्दन :: ८०
जलदि०यं तथा प्राहुर्द्विप्रकारं पुराविद: :
जलहस्तं स्मृतं चैकं मज्जनं चापरं विदु: :: ८१
बाणक्षेपस्तथाऽऽदानं यावद्वीर्यवता कृतम् :
तावत्तं मज्जयेज्जीवेत्तथा तच्छुद्धिमादिशेत् :: ८२
अेवंविधमिदं स्थानं भट्टादित्यस्य भारत :
ममैव कृपया भानोर्ज्ञातिमेतन्महीतले :: ८३

---